# Tripad-Vibhuti-MahanArayana Upanishad

# ત્રિપાદ્વિભૂતિમહાનારાયણોપનિષત્

## Document Information

Text title : TripadvibhuMahanarayana Upanishad

File name : tripadvibhu.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 52 / 108; Atharva Veda - Vaishnava upanishad

Latest update : May 09, 2000, November 9, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ત્રિપાદ્વિભૂતિમહાનારાયણોપનિષત્

યત્રાપહ્નવતાં યાતિ સ્વાવિદ્યાપદવિભ્રમઃ ।
તત્ત્રિપાન્નારાયણાખ્યં સ્વમાત્રમવશિષ્યતે ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

અથ પરમતત્ત્વરહસ્યં જિજ્ઞાસુઃ પરમેષ્ઠી દેવમાનેન
સહસ્રસંવત્સરં તપશ્ચચાર । સહસ્રવર્ષેઽતીતેઽત્યુગ્રતીવ્રતપસા
પ્રસન્નં ભગવન્તં મહાવિષ્ણું બ્રહ્મા પરિપૃચ્છતિ
ભગવન્ પરમતત્ત્વરહસ્યં મે બ્રૂહીતિ । પરમતત્ત્વરહસ્યવક્તા
ત્વમેવ નાન્યઃ કશ્ચિદસ્તિ તત્કથમિતિ । તદેવોચ્યતે । ત્વમેવ સર્વજ્ઞઃ ।
ત્વમેવ સર્વશક્તિઃ । ત્વમેવ સર્વાધારઃ । ત્વમેવ સર્વસ્વરૂપઃ ।
ત્વમેવ સર્વેશ્વરઃ । ત્વમેવ સર્વપ્રવર્તકઃ । ત્વમેવ સર્વપાલકઃ ।
ત્વમેવ સર્વનિવર્તકઃ । ત્વમેવ સદસદાત્મકઃ । ત્વમેવ સદસદ્વિલક્ષણઃ ।
ત્વમેવાન્તર્બહિર્વ્યાપકઃ । ત્વમેવાતિસૂક્ષ્મતરઃ । ત્વમેવાતિમહતો મહીયાન્ ।
ત્વમેવ સર્વમૂલાવિદ્યાનિવર્તકઃ । ત્વમેવાવિદ્યાવિહારઃ ।
ત્વમેવાવિદ્યાધારકઃ । ત્વમેવ વિદ્યાવેદ્યઃ । ત્વમેવ વિદ્યાસ્વરૂપઃ ।
ત્વમેવ વિદ્યાતીતઃ । ત્વમેવ સર્વકારણહેતુઃ । ત્વમેવ સર્વકારણસમષ્ટિઃ ।
ત્વમેવ સર્વકારણવ્યષ્ટિઃ । ત્વમેવાખણ્ડાનન્દઃ । ત્વમેવ પરિપૂર્ણાનન્દઃ ।
ત્વમેવ નિરતિશયાનન્દઃ । ત્વમેવ તુરીયતુરીયઃ । ત્વમેવ તુરીયાતીતઃ ।
ત્વમેવ અનન્તોપનિષદ્વિમૃગ્યઃ । ત્વમેવાખિલશાસ્ત્રૈર્વિમૃગ્યઃ ।
ત્વમેવ બ્રહ્મેશાનપુરન્દરપુરોગમૈરખિલામરૈરખિલાગમૈર્વિમૃગ્યઃ ।
ત્વમેવ સર્વમુમુક્ષુભિર્વિમૃગ્યઃ । ત્વમેવામૃતમયૈર્વિમૃગ્યઃ ।
ત્વમેવામૃતમયસ્ત્વમેવામૃતમયસ્ત્વમેવામૃતમયઃ । ત્વમેવ સર્વં
ત્વમેવ સર્વં ત્વમેવ સર્વમ્ । ત્વમેવ મોક્ષસ્ત્વમેવ મોક્ષદસ્ત્વમેવાખિલમોક્ષસાધનમ્ ।
ન કિઞ્ચિદસ્તિ ત્વદ્વ્યતિરિક્તમ્ । ત્વદ્વ્યતિરિક્તં યત્કિંચિત્પ્રતીયતે તત્સર્વં
બાધિતમિતિ નિશ્ચયમ્ । તસ્માત્ત્વમેવ વક્તા ત્વમેવગુરુસ્ત્વમેવ પિતા

ત્વમેવ સર્વનિયન્તા ત્વમેવ સર્વં ત્વમેવ સદા ધ્યેય ઇતિ સુનિશ્ચિતઃ ।
પરમતત્ત્વજ્ઞસ્તમુવાચ મહાવિષ્ણુરતિપ્રસન્નો ભૂત્વા સાધુસાધ્વિતિ
સાધુપ્રશંસાપૂર્વં સર્વં પરમતત્ત્વરહસ્યં તે કથયામિ ।
સાવધાનેન શ્રુણુ ।
બ્રહ્મન્ દેવદર્શીત્યાખ્યાથર્વણશાખાયાં
પરમતત્ત્વરહસ્યાખ્યાથર્વણમહાનારાયણોપનિષદિ ગુરુશિષ્યસંવાદઃ
પુરાતનઃ પ્રસિદ્ધતયા જાગર્તિ ।
પુરા તત્સ્વરૂપજ્ઞાનેન મહાન્તઃ સર્વં બ્રહ્મભાવં ગતાઃ । યસ્ય શ્રવણેન
સર્વબન્ધઃ પ્રવિનશ્યન્તિ । યસ્ય જ્ઞાનેન સર્વરહસ્યં વિદિતં ભવતિ ।
તત્સ્વરૂપં કથમિતિ । શાન્તો દાન્તોઽતિવિરક્તઃ સુશુદ્ધો ગુરુભક્તસ્તપોનિષ્ઠઃ
શિષ્યો બ્રહ્મનિષ્ઠં ગુરુમાસાદ્ય પ્રદક્ષિણપૂર્વકં દણ્ડવત્પ્રણમ્ય
પ્રાઞ્જલિર્ભૂત્વા વિનયેનોપસંગમ્ય ભગવન્ ગુરો મે પરમતત્ત્વરહસ્યં
વિવિચ્ય વક્તવ્યમિતિ । અત્યાદરપૂર્વકમિતિ હર્ષેણ શિષ્યં બહૂકૃત્ય ગુરુર્વદતિ ।
પરમતત્ત્વરહસ્યોપનિષત્ક્રમઃ કથ્યતે સવાધાનેન શ્રૂયતામ્ ।કથં બ્રહ્મ । કાલત્રયાબાધિતં બ્રહ્મ । સર્વકાલાબાધિતં બ્રહ્મ । સગુણનિર્ગુણસ્વરૂપં બ્રહ્મ । આદિમધ્યાન્તશૂન્યં બ્રહ્મ ।
સર્વં ખલ્વિદં બ્રહ્મ । માયાતીતં ગુણાતીતં બ્રહ્મ ।
અનન્તમપ્રમેયાખણ્ડપરિપૂર્ણં બ્રહ્મ ।
અદ્વિતીયપરમાનન્દશુદ્ધબુદ્ધમુક્તસત્યસ્વરૂપવ્યાપકાભિન્નાપરિચ્છિન્નં બ્રહ્મ ।
સચ્ચિદાનન્દસ્વપ્રકાશં બ્રહ્મ । મનોવાચામગોચરં બ્રહ્મ ।
અમિતવેદાન્તવેદ્યં બ્રહ્મ । દેશતઃ કાલતો વસ્તુતઃ પરિચ્છેદરહિતં બ્રહ્મ ।
સર્વપરિપૂર્ણં બ્રહ્મ તુરીયં નિરાકારમેકં બ્રહ્મ । અદ્વૈતમનિર્વાચ્યં
બ્રહ્મ । પ્રણવાત્મકં બ્રહ્મ । પ્રણવાત્મકત્વેનોક્તં બ્રહ્મ ।
પ્રણવાદ્યખિલમન્ત્રાત્મકં બ્રહ્મ । પાદચતુષ્ટયાત્મકં બ્રહ્મ ।
કિં તત્પાદચતુષ્ટયં બ્રહ્મ ભવતિ । અવિદ્યાપાદઃ
સુવિદ્યાપાદશ્ચાનન્દપાદસ્તુરીયપાદસ્તુરીય ઇતિ ।
તુરીયપાદસ્તુરીયતુરીયં તુરીયાતીતં ચ । કથં પાદચતુષ્ટયસ્ય
ભેદઃ । અવિદ્યાપદઃ પ્રથમઃ પાદો વિદ્યાપાદો દ્વિતીયઃ
આનન્દપાદસ્તૃતીયસ્તુરીયપાદસ્તુરીય ઇતિ । મૂલાવિદ્યા પ્રથમપાદે
નાન્યત્ર । વિદ્યાનન્દતુરીયાંશાઃ સર્વેષુ પાદેષુ વ્યાપ્ય તિષ્ઠન્તિ ।
એવં તર્હિ વિદ્યાદીનાં ભેદઃ કથમિતિ । તત્તત્પ્રાધાન્યેન
તત્તદ્વ્યપદેશઃ । વસ્તુતસ્ત્વભેદ એવ । તત્રાધસ્તનમેકં
પાદમવિદ્યાશબલં ભવતિ । ઉપરિતનપાદત્રયં

શુદ્ધબોધાનન્દલક્ષણમમૃતં ભવતિ ।
તચ્ચાનિર્વાચ્યમનિર્દેશ્યમખણ્ડાનન્દૈકરસાત્મકં ભવતિ ।
તત્ર મધ્યમપાદમધ્યપ્રદેશેઽમિતતેજઃપ્રવાહાકારતયા
નિત્યવૈકુણ્ઠં વિભાતિ ।
તચ્ચ નિરતિશયાનન્દાખણ્ડબ્રહ્માનન્દનિજમૂર્ત્યાકારેણ જ્વલતિ ।
અપરિચ્છિન્નમણ્ડલાનિ યથા દૃશ્યન્તે
તદ્વદખણ્ડાનન્દામિતવૈષ્ણવદિવ્યતેજોરાશ્યન્તર્ગતવિલસન્મહાવિષ્ણોઃ
પરમં પદં વિરાજતે । દુગ્ધોદધિમધ્યસ્થિતામૃતામૃતકલશવદ્વૈષ્ણવં
ધામ પરમં સંદૃશ્યતે ।
સુદર્શનદિવ્યતેજોઽન્તર્ગતઃ સુદર્શનપુરુષો યથા સૂર્યમણ્ડલાન્તર્ગતઃ
સૂર્યનારાયણોઽમિતાપરિચ્છિન્નાદ્વૈતપરમાનન્દલક્ષણતેજોરાશ્યન્તર્ગત
આદિનારાયણસ્તથા સંદૃશ્યતે । સ એવ તુરીયં બ્રહ્મ
સ એવ તુરીયાતીતઃ સ એવ વિષ્ણુઃ સ એવ સમસ્તબ્રહ્મવાચકવાચ્યઃ
સ એવ પરંજ્યોતિઃ સ એવ માયાતીતઃ સ એવ ગુણાતીતઃ સ એવ કાલાતીતઃ
સ એવ અખિલકર્માતીતઃ સ એવ સત્યોપાધિરહિતઃ સ એવ પરમેશ્વરઃ
સ એવ ચિરન્તનઃ પુરુષઃ પ્રણવાદ્યખિલમન્ત્રવાચકવાચ્ય
આદ્યન્તશૂન્ય આદિદેશકાલવસ્તુતુરીયસંજ્ઞાનિત્યપરિપૂર્ણઃ
પૂર્ણઃ સત્યસંકલ્પ આત્મારામઃ કાલત્રયાબાધિતનિજસ્વરૂપઃ
સ્વયંજ્યોતિઃ સ્વયમ્પ્રકાશમયઃ સ્વસમાનાધિકરણશૂન્યઃ
સ્વસમાનાધિકશૂન્યો ન દિવારાત્રિવિભાગો ન સંવત્સરાદિકાલવિભાગઃ
સ્વાનન્દમયાનન્તાચિન્ત્યવિભવ આત્માન્તરાત્મા પરમાત્મા
જ્ઞાનાત્મા તુરીયાત્મેત્યાદિવાચકવાચ્યોઽદ્વૈતપરમાનન્દો
વિભુર્નિત્યો નિષ્કલઙ્કો નિર્વિકલ્પો નિરઞ્જનો નિરાખ્યાતઃ શુદ્ધો દેવ
એકો નારાયણો ન દ્વિતીયોઽસ્તિ કશ્ચિદિતિ ય એવં વેદ સ પુરુષસ્તદીયોપાસનયા
તસ્ય સાયુજ્યમેતીત્યસંશયમિત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ પાદચતુષ્ટયસ્વરૂપનિરૂપણં
નામ પ્રથમોઽધ્યાયઃ ॥ ૧॥

અથેતિ હોવાચ ચ્છાત્રો ગુરું ભગવન્તમ્ ।
ભગવન્વૈકુણ્ઠસ્ય નારાયણસ્ય ચ નિત્યત્વમુક્ત્વમ્ ।
સ એવ તુરીયમિત્યુક્તમેવ । વૈકુણ્ઠઃ સાકારો નારાયણઃ સાકારશ્ચ ।
તુરીયં તુ નિરાકારમ્ । સાકારઃ સાવયવો નિરવયવં નિરાકારમ્ ।

તસ્માત્સાકારમનિત્યં નિત્યં નિરાકારમિતિ શ્રુતેઃ ।
યદ્યત્સાવયવં તત્તદનિત્યમિત્યનુમાનાચ્ચેતિ પ્રત્યક્ષેણ
દૃષ્ટત્વાચ્ચ । અતસ્તયોરનિત્યત્વમેવ વક્તુમુચિતં ભવતિ ।
કથમુક્તં નિત્યત્વમિતિ । તુરીયમક્ષરમિતિ શ્રુતેઃ ।
તુરીયસ્ય નિત્યત્વં પ્રસિદ્ધમ્ । નિત્યત્વાનિત્યત્વે પરસ્પરવિરુદ્ધધર્મૌ । તયોરેકસ્મિન્બ્રહ્મણ્યત્યન્તવિરુદ્ધં ભવતિ । તસ્માદ્વૈકુણ્ઠસ્ય ચ નારાયણસ્ય ચ નિત્યત્વમેવ વક્તુમુચિતં ભવતિ । સત્યમેવ ભવતીતિ દેશિકં પરિહરતિ । સાકારસ્તુ દ્વિવિધઃ । સોપાધિકો નિરુપાધિકશ્ચ । તત્ર સોપાધિકઃ સાકારઃ કથમિતિ । આવિદ્યકમખિલકાર્યકરણજામવિદ્યાપાદ એવ નાન્યત્ર । તસ્માત્સમસ્તાવિદ્યોપાધિઃ સાકારઃ સાવયવ એવ । સાવયવત્વાદવશ્યમનિત્યં ભવત્યેવ । સોપાધિકસાકારો વર્ણિતઃ । તર્હિ નિરુપાધિક સાકારઃ કથમિતિ । નિરુપાધિકસાકારસ્ત્રિવિધઃ । બ્રહ્મવિદ્યાસાકારશ્ચાનન્દસાકારુભયાત્મકસાકારશ્ચેતિ ।

બ્રહ્મવિદ્યાસાકારશ્ચાનન્દસાકાર ઉભયાત્મકસાકારશ્ચેતિ ।

ત્રિવિધસાકારોઽપિ પુનર્દ્વિવિધો ભવતિ । નિત્યસાકારો મુક્તસાકારશ્ચેતિ ।
નિત્યસાકારસ્ત્વાદ્યન્તશૂન્યઃ શાશ્વતઃ । ઉપાસનયા યે મુક્તિં
ગતાસ્તેષાં સાકારો મુક્તસાકારઃ । તસ્યાખણ્ડજ્ઞાનેનાવિર્ભાવો
ભવતિ । સોઽપિ શાશ્વતઃ । મુક્તસાકારસ્ત્વૈચ્છિક ઇતિ । અન્યે વદન્તિ
શાશ્વતત્વં કથમિતિ । અદ્વૈતાખણ્ડપરિપૂર્ણનિરતિશયપરમાનન્દ-
શુદ્ધબુદ્ધમુક્તસત્યાત્મકબ્રહ્મ ચૈતન્યસાકારત્વાત્
નિરુપાધિકસાકારસ્ય નિત્યત્વં સિદ્ધમેવ । તસ્માદેવ નિરુપાધિકસાકારસ્ય
નિરવયવત્વાત્સ્વાધિકમપિ દૂરતો નિરસ્તમેવ । નિરવયવં બ્રહ્મચૈતન્યમિતિ
સર્વોપનિષત્સુ સર્વશાસ્ત્રસિદ્ધાન્તેષુ શ્રૂયતે । અથ ચ
વિદ્યાનન્દતુરીયાણામભેદ એવ શ્રૂયતે । સર્વત્ર વિદ્યાદિસાકારભેદઃ
કથમિતિ । સત્યમેવોક્તમિતિ દેશિકઃ પરિહરતિ । વિદ્યાપ્રાધાન્યેન વિદ્યાસાકારઃ
આનન્દપ્રાધાન્યેનાનન્દસાકારઃ ઉભયપ્રાધાન્યેનોભયાત્મકસાકારશ્ચેતિ ।
પ્રાધાન્યેનાત્ર ભેદ એવ । સ ભેદો વસ્તુતસ્ત્વભેદ એવ ।
ભગવન્નખણ્ડાદ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મણઃ સાકારનિરાકારૌ
વિરુદ્ધધર્મૌ । વિરુદ્ધોભયાત્મકત્વં કથમિતિ । સત્યમેવેતિ ગુરુઃ પરિહરતિ ।
યથા સર્વગતસ્ય નિરાકારસ્ય મહાવાયોશ્ચ તદાત્મકસ્ય ત્વક્પતિત્વેન
પ્રસિદ્ધસ્ય સાકારસ્ય મહાવાયુદેવસ્ય ચાભેદ એવ શ્રૂયતે સર્વત્ર ।
યથા પૃથીવ્યાદીનાં વ્યાપકશરીરાણાં દેવવિશેષણાં ચ
તદ્વિલક્ષણતદભિન્નવ્યાપકા પરિચ્છિન્ના નિજમૂર્ત્યાકારદેવતાઃ
શ્રૂયન્તે સર્વત્ર તદ્વત્પરબ્રહ્મણઃ સર્વાત્મકસ્ય સાકારનિરાકારભેદવિરોધો

નાસ્ત્યેવ વિવિધવિચિત્રાનન્તશક્તેઃ પરબ્રહ્મણઃ
સ્વરૂપજ્ઞાનેનવિરોધો ન વિદ્યતે ।
તદભાવે સત્યનન્તવિરોધો ભવતિ । અથ ચ
રામકૃષ્ણાદ્યવતારેષ્વદ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મણઃ
પરમતત્ત્વપરમવિભવાનુસન્ધાનં સ્વીયત્વેન શ્રૂયતે સર્વત્ર ।
સર્વપરિપૂર્ણસ્યાદ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મણસ્તુ કિં
વક્તવ્યમ્ । અન્યથા સર્વપરિપૂર્ણસ્ય પરબ્રહ્મણઃ પરમાર્થતઃ
સાકારં વિના કેવલ નિરાકારત્વં યદ્યભિમતં તર્હિ કેવલનિરાકારસ્ય
ગગનસ્યેવ પરબ્રહ્મણોઽપિ જડત્વમાપદ્યેત । તસ્માત્પરબ્રહ્મણઃ
પરમાર્થતઃ સાકારનિરાકારૌ સ્વભાવસિદ્ધૌ ।
તથાવિધસ્યાદ્વૈતપરમાનન્દલક્ષણસ્યાદિનારાયણસ્યોન્મેષનિમેષાભ્યાં
મૂલાવિદ્યોદયસ્થિતિલયા જાયન્તે ।
કદાચિદાત્મારામસ્યાખિલપરિપૂર્ણસ્યાદિનારાયણસ્ય
સ્વેચ્છાનુસારેણોન્મેષો ભવતિ । અવ્યક્તાન્મૂલાવિર્ભાવો
મૂલાવિદ્યાવિર્ભાવશ્ચ ।
તસ્માદેવ સચ્છબ્દવાચ્યં બ્રહ્માવિદ્યાશબલં ભવતિ । તતો મહત્ ।
મહતોઽહઙ્કારઃ । અહઙ્કારાત્પઞ્ચતન્માત્રાણિ । પઞ્ચતન્માત્રેભ્યઃ
પઞ્ચમહાભૂતાનિ । પઞ્ચમહાભૂતેભ્યો
બ્રહ્મૈકપાદવ્યાપ્તમેકમવિદ્યાણ્ડં
જાયતે । તત્ર તત્ત્વતો ગુણાતીતશુદ્ધસત્ત્વમયો
લીલાગૃહીતનિરતિશયાનન્દલક્ષણો
માયોપાધિકો નારાયણ આસીત્ । સ એવ નિત્યપરિપૂર્ણઃ
પાદવિભૂતિવૈકુણ્ઠનારાયણઃ ।
સ ચાનન્તકોટિબ્રહ્માણ્ડાનામુદયસ્થિતિલયાદ્યખિલકાર્યકારણજાલ-
પરમકારણકારણભૂતો મહામાયાતીતસ્તુરીયઃ પરમેશ્વરો જયતિ ।
તસ્માત્સ્થૂલવિરાટ્સ્વરૂપો જાયતે । સસર્વકારણમૂલં
વિરાટ્સ્વરૂપો ભવતિ ।
સ ચાનન્તશીર્ષા પુરુષ અનન્તાક્ષિપાણિપાદો ભવતિ ।
અનન્તશ્રવણઃ સર્વમાવૃત્ય તિષ્ઠતિ । સર્વવ્યાપકો ભવતિ ।
સગુણનિર્ગુણસ્વરૂપો ભવતિ । જ્ઞાનબલૈશ્વર્યશક્તિતેજઃસ્વરૂપો ભવતિ ।
વિવિધવિચિત્રાનન્તજગદાકારો ભવતિ ।
નિરતિશયનિરઙ્કુશસર્વજ્ઞસર્વશક્તિસર્વનિયન્તૃત્વા-

ધનન્તકલ્યાણગુણાકારો ભવતિ ।
વાચામગોચરાનન્તદિવ્યતેજોરાશ્યાકારો
ભવતિ । સમસ્તાવિદ્યાણ્ડવ્યાપકો ભવતિ ।
સ ચાનન્તમહામાયાવિલાસાનામધિષ્ઠાનવિશેષ-
નિરતિશયાદ્વૈતપરમાનન્દ-
લક્ષણપરબ્રહ્મવિલાસવિગ્રહો ભવતિ ।
અસ્યૈકૈકરોમકૂપાન્તરેષ્વનન્તકોટિ-
બ્રહ્માણ્ડાનિ સ્થાવરાણિ ચ જાયન્તે । તેષ્વણ્ડેષુ
સર્વેષ્વેકૈકનારાયણાવતારો જાયતે । નારાયણાદ્ધિરણ્યગર્ભો
જાયતે । નારાયણાદણ્ડવિરાટ્સ્વરૂપો જાયતે ।
નારાયણાદખિલલોકસ્રષ્ટૃપ્રજાપતયો
જાયન્તે । નારાયણાદેકાદશરુદ્રાશ્ચ જાયન્તે ।
નારાયણાદખિલલોકાશ્ચ
જાયન્તે । નારાયણાદિન્દ્રો જાયતે । નારાયણાત્સર્વેદેવાશ્ચ જાયન્તે ।
નારાયણાદ્દ્વાદશાદિત્યાઃ સર્વે વસવઃ સર્વે ઋષયઃ
સર્વાણિ ભૂતાનિ સર્વાણિ છન્દાંસિ નારાયણાદેવ સમુત્પદ્યન્તે ।
નારાયણાત્પ્રવર્તન્તે । નારાયણે પ્રલીયન્તે । અથ નિત્યોઽક્ષરઃ
પરમઃ સ્વરાટ્ । બ્રહ્મા નારાયણઃ । શિવશ્ચ નારાયણઃ ।
શક્રશ્ચ નારાયણઃ । દિશશ્ચ નારાયણઃ । વિદિશશ્ચ
નારાયણઃ । કાલશ્ચ નારાયણઃ । કર્માખિલં ચ નારાયણઃ ।
મૂર્તામૂર્તં ચ નારાયણઃ । કારણાત્મકં સર્વં કાર્યાત્મકં
સકલં નારાયણઃ । તદુભયવિલક્ષણો નારાયણઃ । પરંજ્યોતિઃ
સ્વપ્રકાશમયો બ્રહ્માનન્દમયો નિત્યો નિર્વિકલ્પો નિરઞ્જનો
નિરાખ્યાતઃ શુદ્ધો દેવ એકો નારાયણો ન દ્વિતીયોઽસ્તિ કશ્ચિત્ ।
ન સ સમાનાધિક ઇત્યસંશયં પરમાર્થતો ય એવં વેદ ।
સકલબન્ધાંશ્છિત્ત્વા મૃત્યું તીર્ત્વા સ મુક્તો ભવતિ સ મુક્તો
ભવતિ । ય એવં વિદિત્વા સદા તમુપાસ્તે પુરુષઃ સ નારાયણો
ભવતિ સ નારાયણો ભવતીત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ પરબ્રહ્મણઃ
સાકારનિરાકારસ્વરૂપનિરૂપણં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

અથ છાત્રસ્તથેતિહોવાચ । ભગવન્દેશિક પરમતત્ત્વજ્ઞ

સવિલાસમહામૂલાઽવિદ્યોદયક્રમઃ કથિતઃ ।
તદુ પ્રપઞ્ચોત્પત્તિક્રમઃ કીદૃશો ભવતિ । વિશેષેણ
કથનીયઃ । તસ્ય તત્ત્વં વેદિતુમિચ્છામિ । તથેત્યુક્ત્વા
ગુરુરિત્યુવાચ ।યથાનાદિસર્વપ્રપઞ્ચો દૃશ્યતે ।
નિત્યોઽનિત્યો વેતિ સંશય્યેતે । પ્રપઞ્ચોઽપિ દ્વિવિધઃ ।
વિદ્યાપ્રપઞ્ચશ્ચાવિદ્યાપ્રપઞ્ચશ્ચેતિ ।
વિદ્યાપ્રપઞ્ચસ્ય નિત્યત્વં સિદ્ધમેવ નિત્યાનન્દ-
ચિદ્વિલાસાત્મકત્વાત્ । અથ ચ શુદ્ધબુદ્ધમુક્ત-
સત્યાનન્દસ્વરૂપત્વાચ્ચ । અવિદ્યાપ્રપઞ્ચસ્ય
નિત્યત્વમનિત્યત્વં વા કથમિતિ । પ્રવાહતો નિત્યત્વં
વદન્તિ કેચન । પ્રલયાદિકં શ્રૂયમાણત્વાદનિત્યત્વં
વદન્ત્યન્યે । ઉભયં ન ભવતિ । પુનઃ કથમિતિ ।
સંકોચવિકાસાત્મકમહામાયાવિલાસાત્મક એવ
સર્વોઽપ્યવિદ્યાપ્રપઞ્ચઃ । પરમાર્થતો ન કિંચિદસ્તિ
ક્ષણશૂન્યાનાદિમૂલાઽવિદ્યાવિલાસત્વાત્ । તત્કથમિતિ ।
એકમેવાદ્વિતીયં બ્રહ્મ । નેહ નાનાસ્તિ કિંચન ।
તસ્માદ્બ્રહ્મવ્યતિરિક્તં સર્વં બાધિતમેવ । સત્યમેવ
પરમ્બ્રહ્મ સત્યં જ્ઞાનમનન્તં બ્રહ્મ ।
તતઃ સવિલાસમૂલાઽવિદ્યોપસંહારક્રમઃ કથમિતિ ।
અત્યાદરપૂર્વકમતિહર્ષેણ દેશિક ઉપદિશતિ ।
ચતુર્યુગસહસ્રાણિ બ્રહ્મણો દિવા ભવતિ ।
તાવતા કાલેન પુનસ્તસ્ય રાત્રિર્ભવતિ । દ્વે અહોરાત્રે એકં
દિનં ભવતિ । તસ્મિન્નેકસ્મિન્દિને આસત્યલોકાન્તમુદયસ્થિતિલયા
જાયન્તે । પઞ્ચદશદિનાનિ પક્ષો ભવતિ । પક્ષદ્વયં માસો
ભવતિ । માસદ્વયમૃતુર્ભવતિ । ઋતુત્રયમયનં ભવતિ ।
અયનદ્વયં વત્સરો ભવતિ । વત્સરશતં બ્રહ્મમાનેન
બ્રહ્મણઃ પરમાયુઃપ્રમાણમ્ ।તાવત્કાલસ્તસ્ય સ્થિતિરુચ્યતે ।
સ્થિત્યન્તેઽણ્ડવિરાટ્પુરુષઃ સ્વાંશં હિરણ્યગર્ભમભ્યેતિ ।
હિરણ્યગર્ભસ્ય કારણં પરમાત્માનમણ્ડપરિપાલકનારાયણમભ્યેતિ ।
પુનર્વત્સરશતં તસ્ય પ્રલયો ભવતિ । તદા જીવાઃ સર્વે
પ્રકૃતૌ પ્રલીયન્તે । પ્રલયં સર્વશૂન્યં ભવતિ । તસ્ય
બ્રહ્મણઃ સ્થિતિપ્રલયાવાદિનારાયણસ્યાંશેનાવતીર્ણ-

સ્યાણ્ડપરિપાલકસ્ય મહાવિષ્ણોરહોરાત્રિસંજ્ઞકૌ ।
તે અહોરાત્રે એકં દિનં ભવતિ । એવં દિનપક્ષમાસ-
સંવત્સરાદિભેદાચ્ચ તદીયમાનેન શતકોટિવત્સરકાલસ્તસ્ય
સ્થિતિરુચ્યતે । સ્થિત્યન્તે સ્વાંશં મહાવિરાટ્પુરુષમભ્યેતિ ।
તતઃ સાવરણં બ્રહ્માણ્ડં વિનાશમેતિ । બ્રહ્માણ્ડાવરણં
વિનશ્યતિ તદ્ધિ વિષ્ણોઃ સ્વરૂપમ્ । તસ્ય તાવત્પ્રલયો ભવતિ ।
પ્રલયે સર્વશૂન્યં ભવતિ । અણ્ડપરિપાલકમહાવિષ્ણોઃ
સ્થિતિપ્રલયાવાદિવિરાટ્પુરુષસ્યાહોરાત્રિસંજ્ઞકૌ તે અહોરાત્રે
એકં દિનં ભવતિ । એવં દિનપક્ષમાસસંવત્સરાદિભેદાચ્ચ
તદીયમાનેન શતકોટિવત્સરકાલસ્તસ્ય સ્થિતિરુચ્યતે । સ્થિત્યન્તે
આદિવિરાટ્પુરુષઃ સ્વાંશમાયોપાધિકનારાયણમભ્યેતિ ।
તસ્ય વિરાટ્પુરુષસ્ય યાવત્સ્થિતિકાલસ્તાવત્પ્રલયો ભવતિ । પ્રલયે
સર્વશૂન્યં ભવતિ । વિરાટ્સ્થિતિપ્રલયૌ મૂલાવિદ્યાણ્ડપરિપાલક-
સ્યાદિનારાયણસ્યાહોરાત્રિસંજ્ઞકૌ । તે અહોરાત્રે એકં દિનં ભવતિ ।
એવં દિનપક્ષમાસસંવત્સરાદિભેદાચ્ચ તદીયમાનેન
શતકોટિવત્સરકાલસ્તસ્ય સ્થિતિરુચ્યતે । સ્થિત્યન્તે ત્રિપાદ્વિભૂતિનારાયણ
સ્વેચ્છાવશાન્નિમેષો જાયતે । તસ્માન્મૂલાવિદ્યાણ્ડસ્ય
સાવરણસ્ય વિલયો ભવતિ । તતઃ સવિલાસમૂલવિદ્યા
સર્વકાર્યોપાધિસમન્વિતા સદસદ્વિલક્ષણાનિર્વાચ્યા
લક્ષણશૂન્યાવિર્ભાવતિરોભાવાત્મિકાનાદ્યખિલકારણ-
કારણાનન્તમહામાયાવિશેષણવિશેષિતા
પરમસૂક્ષ્મમૂલકારણમવ્યક્તં વિશતિ । અવ્યક્તં
વિશેદ્બ્રહ્મણિ નિરિન્ધનો વૈશ્વાનરો યથા । તસ્માન્માયોપાધિક
આદિનારાયણસ્તથા સ્વસ્વરૂપં ભજતિ । સર્વે જીવાશ્ચ
સ્વસ્વરૂપં ભજન્તે । યથા જપાકુસુમસાન્નિધ્યાદ્રક્તસ્ફટિક-
પ્રતીતિસ્તદભાવે શુદ્ધસ્ફટિકપ્રતીતિઃ । બ્રહ્મણોપિ
માયોપાધિવશાત્સગુણપરિચ્છિન્નાદિપ્રતીતિરુપાધિ-
વિલયાન્નિર્ગુણનિરવયવાદિપ્રતીતિરિત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ
મૂલાવિદ્યાપ્રલયસ્વરૂપણં નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥

ૐ તતસ્તસ્માન્નિર્વિશેષમતિનિર્મલં ભવતિ ।

અવિદ્યાપાદમતિશુદ્ધં ભવતિ । શુદ્ધબોધાનન્દ-
લક્ષણકૈવલ્યં ભવતિ । બ્રહ્મણઃ પાદચતુષ્ટયં
નિર્વિશેષં ભવતિ । અખણ્ડલક્ષણાખણ્ડપરિપૂર્ણ-
સચ્ચિદાનન્દસ્વપ્રકાશં ભવતિ । અદ્વિતીયમનીશ્વરં
ભવતિ । અખિલકાર્યકારણસ્વરૂપમખણ્ડચિદ્ઘનાનન્દ-
સ્વરૂપમતિદિવ્યમઙ્ગલાકારં નિરતિશયાનન્દતેજોરાશિ-
વિશેષં સર્વપરિપૂર્ણાનન્તચિન્મયસ્તમ્ભાકારં
શુદ્ધબોધાનન્દવિશેષાકારમનન્તચિદ્વિલાસવિભૂતિ-
સમષ્ટ્યાકારમદ્ભુતાનન્દાશ્ચર્યવિભૂતિવિશેષાકારમનન્ત-
પરિપૂર્ણાનન્દદિવ્યસૌદામિનીનિચયાકારમ્ ।
એવમાકારમદ્વિતીયાખણ્ડાનન્દબ્રહ્મસ્વરૂપં નિરૂપિતમ્ ।
અથ છાત્રો વદતિ ।
ભગવન્પાદભેદાદિકં કથં કથમદ્વૈતસ્વરૂપમિતિ
નિરૂપિતમ્ । દેશિકઃ પરિહરતિ । વિરોધો ન વિદ્યતે બ્રહ્માદ્વિતીયમેવ
સત્યમ્ । તથૈવોક્તં ચ । બ્રહ્મભેદો ન કથિતો બ્રહ્મવ્યતિરિક્તં
ન કિંચિદસ્તિ । પાદભેદાદિકથનં તુ બ્રહ્મસ્વરૂપકથનમેવ ।
તદેવોચ્યતે । પાદચતુષ્ટયાત્મકં બ્રહ્મ તત્રૈકમવિદ્યાપાદમ્ ।
પાદત્રયમમૃતં ભવતિ । શાખાન્તરોપનિષત્સ્વરૂપમેવ નિરૂપિતમ્ ।
તમસસ્તુ પરં જ્યોતિઃ પરમાનન્દલક્ષણમ્ । પાદત્રયાત્મકં બ્રહ્મ
કૈવલ્યં શાશ્વતં પરમિતિ । વેદાહમેતં પુરુષં મહાન્તમાદિત્યવર્ણં
તમસઃ પરસ્તાત્ । તમેવંવિદ્વાનમૃતૈહ ભવતિ । નાન્યઃ પન્થા
વિદ્યતેઽયનાય । સર્વેષાં જ્યોતિષાં જ્યોતિસ્તમસઃ પરમુચ્યતે ।
સર્વસ્ય ધાતારમચિન્ત્યરૂપમાદિત્યવર્ણં પરંજ્યોતિસ્તમસ ઉપરિ વિભાતિ ।
યદેકમવ્યક્તમનન્તરૂપં વિશ્વં પુરાણં તમસઃ પરસ્તાત્ ।
તદેવર્તં તદુ સત્યમાહુસ્તદેવ સત્યં તદેવ બ્રહ્મ પરમં વિશુદ્ધં
કથ્યતે । તમશ્શબ્દેનાવિદ્યા । પાદોઽસ્ય વિશ્વા ભૂતાનિ ।
ત્રિપાદસ્યામૃતં દિવિ । ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ ।
પાદોઽસ્યેહાભવત્પુનઃ । તતો વિશ્વઙ્ વ્યક્રામત્ ।
સાશનાઽનશને અભિ ।
વિદ્યાનન્દતુરીયાખ્યપાદત્રયમમૃતં ભવતિ ।
અવશિષ્ટમવિદ્યાશ્રયમિતિ ।
આત્મારામસ્યાનાદિનારાયણસ્ય કીદૃશાવુન્મેષનિમેષૌ તયોઃ

સ્વરૂપં કથમિતિ । ગુરુર્વદતિ । પરાગ્દૃષ્ટિરુન્મેષઃ ।
પ્રત્યગ્દૃષ્ટિર્નિમેષઃ । પ્રત્યગ્દૃષ્ટ્યા સ્વસ્વરૂપચિન્તનમેવ
નિમેષઃ । પરાગ્દૃષ્ટ્યા સ્વસ્વરૂપચિન્તનમેવોન્મેષઃ ।
યાવદુન્મેષકાલસ્તાવન્નિમેષકાલો ભવતિ । અવિદ્યાયાઃ
સ્થિતિરુન્મેષકાલે નિમેષકાલે તસ્યાઃ પ્રલયો ભવતિ । યથા
ઉન્મેષો જાયતે તથા ચિરન્તનાતિસૂક્ષ્મવાસનાબલાત્પુનરવિદ્યાયા
ઉદયો ભવતિ । યથાપૂર્વમવિદ્યાકાર્યાણિ જાયન્તે ।
કાર્યકારણોપાધિભેદાજ્જીવેશ્વરભેદોઽપિ દૃશ્યતે ।
કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ । ઈશ્વરસ્ય મહામાયા
તદાજ્ઞાવશવર્તિની । તત્સંકલ્પાનુસારિણી વિવિધાનન્તમહામાયા-
શક્તિસંસવેતિનાનન્તમહામાયા જાલજનનમન્દિરા મહાવિષ્ણોઃ
ક્રીડાશરીરરૂપિણી બ્રહ્માદીનામગોચરા । એતાં મહામાયાં
તરન્ત્યેવ યે વિષ્ણુમેવ ભજન્તિ નાન્યે તરન્તિ કદાચન ।
વિવિધોપચૈરપિ અવિદ્યાકાર્યાણ્યન્તઃકરણાન્યતીત્ય કાલાનનુ તાનિ
જાયન્તે । બ્રહ્મચૈતન્યં તેષુ પ્રતિબિમ્બિતં ભવતિ । પ્રતિબિમ્બા એવ
જીવા ઇતિ કથ્યન્તે । અન્તઃકરણોપાધિકાઃ સર્વે જીવા ઇત્યેવં વદન્તિ ।
મહાભૂતોત્થસૂક્ષ્માઙ્ગોપાધિકાઃ સર્વે જીવા ઇત્યેકે વદન્તિ ।
બુદ્ધિપ્રતિબિમ્બિતચૈતન્યં જીવા ઇત્યપરે મન્યન્તે ।
એતેષામુપાધીનામત્યન્તભેદો ન વિદ્યતે । સર્વપરિપૂર્ણો
નારાયણસ્ત્વનયા નિજયા ક્રીડતિ સ્વેચ્છયા સદા ।
તદ્વદવિદ્યમાનફલ્ગુવિષયસુખાશયાઃ સર્વે જીવાઃ
પ્રભાવન્ત્યસારસંસારચક્રે । એવમનાદિપરમ્પરા
વર્તતેઽનાદિસંસારવિપરીતભ્રમાદિત્યુપનિષત્ ॥

ઇત્યથર્વણશાખાયાં ત્રિપાદ્વિભૂતિમહાનારાયણોપનિષદિ
મહામાયાતીતાખણ્ડાદ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મણઃ
પરમતત્ત્વસ્વરૂપનિરૂપણં નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

પૂર્વકાણ્ડઃ સમાપ્તઃ ॥

અથ શિષ્યો વદતિ ગુરું ભગવન્તં નમસ્કૃત્ય
ભગવન્ સર્વાત્મના નષ્ટાયા અવિદ્યાયાઃ
પુનરુદયઃ કથમ્ । સત્યમેવેતિ ગુરુરિતિ હોવાચ ।
પ્રાવૃટ્કાલપ્રારમ્ભે યથા મણ્ડૂકાદીનાં

પ્રાદુર્ભાવસ્તદ્વત્સર્વાત્મના નષ્ટાયા અવિદ્યાયા
ઉન્મેષકાલે પુનરુદયો ભવતિ । ભગવન્ કથં
જીવાનામનાદિસંસારભ્રમઃ । તન્નિવૃત્તિર્વા કથમિતિ ।
કથં મોક્ષમાર્ગસ્વરૂપં ચ । મોક્ષસાધનં
કથમિતિ । કો વા મોક્ષોપાયઃ । કીદૃશં મોક્ષસ્વરૂપમ્ ।
કા વા સાયુજ્યમુક્તિઃ । એતત્સર્વં તત્ત્વતઃ કથનીયમિતિ ।
અત્યાદરપૂર્વકમતિહર્ષેણ શિષ્યં બહૂકૃત્ય
ગુરુર્વદતિ શ્રૂયતાં સાવધાનેન ।
કુત્સિતાનન્તજન્માભ્યસ્તાત્યન્તોત્કૃષ્ટ-
વિવિધવિચિત્રાનન્તદુષ્કર્મવાસનાજાલવિશેષૈર્દેહાત્મવિવેકો
ન જાયતે । તસ્માદેવ દૃઢતરદેહાત્મભ્રમો ભવતિ ।
અહમજ્ઞઃ કિંચિજ્જ્ઞોઽહમહં જીવોઽહમત્યન્તદુઃખાકારો।
અહમનાદિસંસારીતિ ભ્રમવાસનાબલાત્સંસાર એવ
પ્રવૃત્તિસ્તન્નિવૃત્ત્યુપાયઃ કદાપિ ન વિદ્યતે ।
મિથ્યાભૂતાન્સ્વપ્નતુલ્યાન્વિષયભોગાનનુભૂય
વિવિધાનસંખ્યાનતિદુર્લભાન્મનોરથાનનવરતમાશાસ્યમાનઃ
અતૃપ્તઃ સદા પરિધાવતિ । વિવિધવિચિત્રસ્થૂલસૂક્ષ્મોત્કૃષ્ટ-
નિકૃષ્ટાનન્તદેહાન્પરિગૃહ્ય તત્તદ્દેહવિહિતવિવિધવિચિત્રાઽનેક-
શુભાશુભપ્રારબ્ધકર્માણ્યનુભૂય તત્તત્કર્મફલ-
વાસનાજાલવાસિતાન્તઃકરણાનાં પુનઃપુનસ્તત્તત્કર્મફલ-
વિષયપ્રવૃત્તિરેવ જાયતે । સંસારનિવૃત્તિમાર્ગપ્રવૃત્તિઃ
કદાપિ ન જાયતે । તસ્માદનિષ્ટમેવેષ્ટમિવ ભાતિ ।
ઇષ્ટમેવાઽનિષ્ટમિવ ભાત્યનાદિસંસારવિપરીતભ્રમાત્ ।
તસ્માત્સર્વેષાં જીવાનામિષ્ટવિષયે બુદ્ધિઃ
સુખબુદ્ધિર્દુઃખબુદ્ધિશ્ચ ભવતિ । પરમાર્થતસ્ત્વબાધિત-
બ્રહ્મસુખવિષયે પ્રવૃત્તિરેવ ન જાયતે । તત્સ્વરૂપજ્ઞાનાભાવાત્ ।
તત્કિમિતિ ન વિદ્યતે । કથં બન્ધઃ કથં મોક્ષ ઇતિ વિચારાભાવાચ્ચ ।
તત્કથમિતિ । અજ્ઞાનપ્રાબલ્યાત્ । કસ્માદજ્ઞાનપ્રાબલ્યમિતિ ।
ભક્તિજ્ઞાનવૈરાગ્યવાસનાભાવાચ્ચ । તદભાવઃ કથમિતિ ।
અત્યન્તાન્તઃકરણમલિનવિશેષાત્ । અતઃ સંસારતરણોપાયઃ
કથમિતિ । દેશિકસ્તમેવ કથયતિ । સકલવેદશાસ્ત્રસિદ્ધાન્તરહસ્ય-
જન્માભ્યસ્તાત્યન્તોત્કૃષ્ટસુકૃતપરિપાકવશાત્સદ્ભિઃ

સઙ્ગો જાયતે । તસ્માદ્વિધિનિષેધવિવેકો ભવતિ । તતઃ
સદાચારપ્રવૃત્તિર્જાયતે । સદાચારાદખિલદુરિતક્ષયો
ભવતિ । તસ્માદન્તઃકરણમતિવિમલં ભવતિ ।
તતઃ સદ્ગુરુકટાક્ષમન્તઃકરણમાકાઙ્ક્ષતિ ।
તસ્માત્સદ્ગુરુકટાક્ષલેશવિશેષેણ સર્વસિદ્ધયઃ સિદ્ધ્યન્તિ ।
સર્વબન્ધાઃ પ્રવિનશ્યન્તિ । શ્રેયોવિઘ્નાઃ સર્વે પ્રલયં યાન્તિ ।
સર્વાણિ શ્રેયાંસિ સ્વયમેવાયાન્તિ ।
યથા જાત્યન્ધસ્ય રૂપજ્ઞાનં ન વિદ્યતે
તથા ગુરૂપદેશેન વિના કલ્પકોટિભિસ્તત્ત્વજ્ઞાનં
ન વિદ્યતે । તસ્માત્સદ્ગુરુકટાક્ષલેશવિશેષેણાચિરાદેવ
તત્ત્વજ્ઞાનં ભવતિ । યદા સદ્ગુરુકટાક્ષો ભવતિ તદા
ભગવત્કથાશ્રવણધ્યાનાદૌ શ્રદ્ધા જાયતે ।
તસ્માદ્ધૃદયસ્થિતાનાદિદુર્વાસનાગ્રન્થિવિનાશો ભવતિ ।
તતો હૃદયસ્થિતાઃ કામાઃ સર્વે વિનશ્યન્તિ ।
તસ્માદ્ધૃદયપુણ્ડરીકકર્ણિકાયાં પરમાત્માવિર્ભાવો
ભવતિ । તતો દૃઢતરા વૈષ્ણવી ભક્તિર્જાયતે । તતો
વૈરાગ્યમુદેતિ । વૈરાગ્યાદ્બુદ્ધિવિજ્ઞાનાવિર્ભાવો ભવતિ ।
અભ્યાસાત્તજ્જ્ઞાનં ક્રમેણ પરિપક્વં ભવતિ ।
પક્વવિજ્ઞાનાજ્જીવન્મુક્તો ભવતિ । તતઃ શુભાશુભકર્માણિ
સર્વાણિ સવાસનાનિ નશ્યન્તિ । તતો દૃઢતરશુદ્ધસાત્ત્વિક-
વાસનયા ભક્ત્યતિશયો ભવતિ । ભક્ત્યતિશયેન નારાયણઃ
સર્વમયઃ સર્વાવસ્થાસુ વિભાતિ । સર્વાણિ જગન્તિ
નારાયણમયાનિ પ્રવિભાન્તિ । નારાયણવ્યતિરિક્તં ન કિંચિદસ્તિ ।
ઇત્યેતદ્બુદ્ધ્વા વિહરત્યુપાસકઃ સર્વત્ર ।
નિરન્તરસમાધિપરમ્પરાભિર્જગદીશ્વરાકારાઃ સર્વત્ર
સર્વાવસ્થાસુ પ્રવિભાન્તિ । અસ્ય મહાપુરુષસ્ય
ક્વચિત્ક્વચિદીશ્વરસાક્ષાત્કારો ભવતિ ।
અસ્ય દેહત્યાગેચ્છા યદા ભવતિ તદા વૈકુણ્ઠપાર્ષદાઃ સર્વે
સમાયાન્તિ । તતો ભગવદ્ધ્યાનપૂર્વકં હૃદયકમલે
વ્યવસ્થિતમાત્માનં સંચિત્ય સમ્યગુપચારૈરભ્યર્ચ્ય
હંસમન્ત્રમુચ્ચરન્ત્સર્વાણિ દ્વારાણિ સંયમ્ય સમ્યઙ્મનો
નિરુધ્ય ચોર્ધ્વગેન વાયુના સહ પ્રણવેન પ્રણવાનુસન્ધાનપૂર્વકં

શનૈઃ શનૈરાબ્રહ્મરન્ધ્રાદ્વિનિર્ગત્ય સોઽહમિતિ મન્ત્રેણ
દ્વાદશાન્તસ્થિતજ્ઞાનાત્માનમેકીકૃત્ય પઞ્ચોપચારૈરભ્યર્ચ્ય
પુનઃ સોઽહમિતિ મન્ત્રેણ ષોડશાન્તસ્થિતજ્ઞાનાત્માનમેકીકૃત્ય
સમ્યગુપચારૈરભ્યર્ચ્ય પ્રાકૃતપૂર્વદેહં પરિત્યજ્ય
પુનઃકલ્પિતમન્ત્રમયશુદ્ધબ્રહ્મતેજોમયનિરતિશયાનન્દમય-
મહાવિષ્ણૂસારૂપ્યવિગ્રહં પરિગૃહ્ય સૂર્યમણ્ડલાન્તર્ગતાનન્ત-
દિવ્યચરણારવિન્દાઙ્ગુષ્ઠનિર્ગતનિરતિશયાનન્દમયાપરનદી-
પ્રવાહમાકૃષ્ય ભાવનયાત્ર સ્નાત્વા
વસ્ત્રાભરણાદ્યુપચારૈરાત્મપૂજાં વિધાય સાક્ષાન્નારાયણો ભૂત્વા તતો
ગુરુનમસ્કારપૂર્વકં પ્રણવગરુડં ધ્યાત્વા ધ્યાનેનાવિર્ભૂત-
મહાપ્રણવગરુડં પઞ્ચોપચારૈરારાધ્ય ગુર્વનુજ્ઞયા
પ્રદક્ષિણનમસ્કારપૂર્વકં પ્રણવગરુડમારુહ્ય મહાવિષ્ણોઃ
સમસ્તાસાધારણચિહ્નચિહ્નિતો મહાવિષ્ણોઃ
સમસ્તાસાધારણદિવ્યભૂષણૈર્ભૂષિતઃ સુદર્શનપુરુષં
પુરસ્કૃત્ય વિષ્વક્સેનપરિપાલિતો વૈકુણ્ઠપાર્ષદૈઃ પરિવેષ્ટિતો
નભોમાર્ગમાવિશ્ય પાર્શ્વદ્વયસ્થિતાનેકપુણ્યલોકાનતિક્રમ્ય
તત્રત્યૈઃ પુણ્યપુરુષૈરભિપૂજિતઃ સત્યલોકમાવિશ્ય
બ્રહ્માણમભ્યર્ચ્ય બ્રહ્મણા ચ સત્યલોકવાસિભિઃ
સર્વૈરભિપૂજિતઃ શૈવમીશાનકૈવલ્યમાસાદ્ય શિવં ધ્યાત્વા
શિવમભ્યર્ચ્ય શિવગણૈઃ સર્વૈઃ શિવેન ચાભિપૂજિતો
મહર્ષિમણ્ડલાન્યતિક્રમ્ય સૂર્યસોમમણ્ડલે ભિત્ત્વા
કીલકનારાયણં ધ્યાત્વા ધ્રુવમણ્ડલસ્ય દર્શનં કૃત્વા
ભગવન્તં ધ્રુવમભિપૂજ્ય તતઃ શિંશુમારચક્રં
વિભિદ્ય શિંશુમારપ્રજાપતિમભ્યર્ચ્ય
ચક્રમધ્યગતં સર્વાધારં સનાતનં
મહાવિષ્ણુમારાધ્ય તેન પૂજિતસ્તત
ઉપર્યુપરિ ગત્વા પરમાનન્દં પ્રાપ્ય પ્રકાશતે ।
તતો વૈકુણ્ઠવાસિનઃ સર્વે સમાયાન્તિ
તાન્ત્સર્વાન્સુસમ્પૂજ્ય તૈઃ સર્વૈરભિપૂજિત-
શ્ચોપર્યુપરિ ગત્વા વિરજાનદીં પ્રાપ્ય
તત્ર સ્નાત્વા ભગવદ્ધ્યાનપૂર્વકં પુનર્નિમજ્જ્ય
તત્રાપઞ્ચીકૃતભૂતોત્થં સૂક્ષ્માઙ્ગભોગ-

સાધનં સૂક્ષ્મશરીરમુત્સૃજ્ય કેવલમન્ત્રમયદિવ્યતેજોમય-
નિરતિશયાનન્દમયમહાવિષ્ણુસારૂપ્યવિગ્રહં
પરિગૃહ્ય તત ઉન્મજ્યાત્મપૂજાં વિધાય
પ્રદક્ષિણનમસ્કારપૂર્વકં બ્રહ્મમયવૈકુણ્ઠમાવિશ્ય
તત્રત્યાન્વિશેષેણ સમ્પૂજ્ય તન્મધ્યે ચ
બ્રહ્માનન્દમયાનન્તપ્રાકારપ્રાસાદતોરણ-
વિમાનોપવનાવલિભિર્જ્વલચ્છિખરૈરુપલક્ષિતો
નિરુપમનિત્યનિરવદ્યનિરતિશયનિરવધિક-
બ્રહ્માનન્દાચલો વિરાજતે । તદુપરિ જ્વલતિ
નિરતિશયાનન્દદિવ્યતેજોરાશિઃ । તદભ્યન્તરસંસ્થાને
શુદ્ધબોધાનન્દલક્ષણં વિભાતિ । તદન્તરાલે ચિન્મયવેદિકા
આનન્દવેદિકાનન્દવનવિભૂષિતા । તદભ્યન્તરે
અમિતતેજોરાશિસ્તદુપરિજ્વલતિ । પરમમઙ્ગલાસનં
વિરાજતે । તત્પદ્મકર્ણિકાયાં શુદ્ધશેષભોગાસનં
વિરાજતે । તસ્યોપરિ સમાસીનમાનન્દપરિપાલકમાદિનારાયણં
ધ્યાત્વા તમીશ્વરં વિવિધોપચારૈરારાધ્ય
પ્રદક્ષિણનમસ્કારાન્વિધાય તદનુજ્ઞાતશ્ચોપર્યુપરિ ગત્વા
પઞ્ચવૈકુણ્ઠાનતીત્યાણ્ડવિરાટ્કૈવલ્યં પ્રાપ્ય તં
સમારાધોપાસકઃ પરમાનન્દં પ્રાપેત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ સંસારતરણોપાયકથનદ્વારા
પરમમોક્ષમાર્ગસ્વરૂપનિરૂપણં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

યત ઉપાસકઃ પરમાનન્દં પ્રાપ સાવરણં
બ્રહ્માણ્ડં ચ ભિત્ત્વા પરિતઃ સમવલોક્ય
બ્રહ્માણ્ડસ્વરૂપં નિરીક્ષ્ય પરમાર્થતસ્તત્સ્વરૂપં
બ્રહ્મજ્ઞાનેનાવબુધ્ય સમસ્તવેદશાસ્ત્રેતિહાસપુરાણાનિ
સમસ્તવિદ્યાજાલાનિ બ્રહ્માદયઃ સુરાઃ સર્વે સમસ્તાઃ
પરમર્ષયશ્ચાણ્ડાભ્યન્તરપ્રપઞ્ચૈકદેશમેવ
વર્ણયન્તિ । અણ્ડસ્વરૂપં ન જાનન્તિ । બ્રહ્માણ્ડાદ્બહિઃ
પ્રપઞ્ચજ્ઞાનં ન જાનન્ત્યેવ । કુતોઽણ્ડાન્તરાન્તર્બહિઃ
પ્રપઞ્ચજ્ઞાનં દૂરતો મોક્ષપ્રપઞ્ચજ્ઞાનમવિદ્યા
ચેતિ કથં બ્રહ્માણ્ડસ્વરૂપમિતિ । કુક્કુટાણ્ડાકારં

મહદાદિસમષ્ટ્યાકારણમણ્ડં તપનીયમયં
તપ્તજામ્બૂનદપ્રભમુદ્યત્કોટિદિવાકરાભં
ચતુર્વિધસૃષ્ટ્યુપલક્ષિતં મહાભૂતૈઃ
પઞ્ચભિરાવૃતં મહદહઙ્કૃતિતમોભિશ્ચ
મૂલપ્રકૃત્યા પરિવેષ્ટિતમ્ । અણ્ડભીતિવિશાલં
સપાદકોટિયોજનપ્રમાણમ્ । એકૈકાવરણં તથૈવ ।
અણ્ડપ્રમાણં પરિતોઽયુતદ્વયકોટિયોજનપ્રમાણં
મહામણ્ડૂકાદ્યનન્તશક્તિભિરધિષ્ઠિતં
નારાયણક્રીડાકન્તુકં પરમાણુવદ્વિષ્ણુલોકસુસંલગ્ન-
મદૃષ્ટશ્રુતવિવિધવિચિત્રાનન્તવિશેષૈરુપલક્ષિતમ્ ।
અસ્ય બ્રહ્માણ્ડસ્ય સમન્તતઃ સ્થિતાન્યેતાદૃશાન્યનન્ત-
કોટિબ્રહ્માણ્ડાનિ સાવરણાનિ જ્વલન્તિ ।
ચતુર્મુખપઞ્ચમુખષણ્મુખસપ્તમુખ-
અષ્ટમુખાદિસંખ્યાક્રમેણ સહસ્રાવધિમુખા-
ન્તૈર્નારાયણાંશૈ રજોગુણપ્રધાનૈરેકૈકસૃષ્ટિ-
કર્તૃભિરધિષ્ઠિતાનિ વિષ્ણુમહેશ્વરાખ્યૈર્નારાયણાંશૈઃ
સત્ત્વતમોગુણપ્રધાનૈરેકૈકસ્થિતિસંહારકર્તૃભિરધિષ્ઠિતાનિ
મહાજલૌઘમત્સ્યબુદ્બુદાનન્તસઙ્ઘવદ્ભ્રમન્તિ ।
ક્રીડાસક્તજાલકકરતલામલકવૃન્દવન્મહાવિષ્ણોઃ
કરતલે વિલસન્ત્યનન્તકોટિબ્રહ્માણ્ડાનિ । જલયન્ત્રસ્થઘટમાલિકા-
જાલવન્મહાવિષ્ણોરેકૈકરોમકૂપાન્તરેષ્વનન્તકોટિબ્રહ્માણ્ડાનિ
સાવરણાનિ ભ્રમન્તિ । સમસ્તબ્રહ્માણ્ડાન્તર્બહિઃ પ્રપઞ્ચરહસ્યં
બ્રહ્મજ્ઞાનેનાવબુધ્ય વિવિધવિચિત્રાનન્તપરમવિભૂતિસમષ્ટિ-
વિશેષન્ત્સમવલોક્યાત્યાશ્ચર્યામૃતસાગરે નિમજ્જ્ય
નિરતિશયાનન્દપારાવારો ભૂત્વા સમસ્તબ્રહ્માણ્ડજાલાનિ
સમુલ્લઙ્ઘ્યામિતાપરિચ્છિન્નાનન્તતમઃ સાગરમુત્તીર્ય
મૂલાવિદ્યાપુરં દૃષ્ટ્વા વિવિધવિચિત્રાનન્તમહામાયા-
વિશેષૈઃ પરિવેષ્ટિતામનન્તમહામાયાશક્તિસમષ્ટ્યાકારામનન્તદિવ્ય-
તેજોજ્વાલાજાલૈરલઙ્કૃતામનન્તમહામાયાવિલસાનાં
પરમાધિષ્ઠાનવિશેષાકારાં શશ્વદમિતાનન્દાચલોપરિ
વિહારિણીં મૂલપ્રકૃતિજનનીમવિદ્યાલક્ષ્મીમેવં ધ્યાત્વા
વિવિધોપચારૈરારાધ્ય સમસ્તબ્રહ્માણ્ડસમષ્ટિજનનીં

વૈષ્ણવીં મહામાયાં નમસ્કૃત્ય તયા ચાનુજ્ઞાતશ્ચોપર્યુપરિ
ગત્વા મહાવિરાટ્પદં પ્રાપ ॥

મહાવિરાટ્સ્વરૂપં કથમિતિ । સમસ્તાવિદ્યાપાદકો
વિરાટ્ । વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતોહસ્ત
ઉત વિશ્વતસ્પાત્ । સમ્બાહુભ્યાં નમતિ સમ્પતત્રૈર્દ્યાવાપૃથિવી
જનયન્દેવ એકઃ । ન સન્દૃશે તિષ્ઠતિ
રૂપમસ્ય ન ચક્ષુષા પશ્યતિ કશ્ચનૈનમ્ ।
હૃદા મનીષા મનસાભિક્લૃપ્તો ય એનં વિદુરમૃતાસ્તે
ભવન્તિ । મનોવાચામગોચરમાદિવિરાટ્સ્વરૂપં
ધ્યાત્વા વિવિધોપચારૈરારાધ્ય તદનુજ્ઞાતશ્ચોપર્યુપરિ
ગત્વા વિવિધવિચિત્રાનન્તમૂલાવિદ્યાવિલાસાનવલોક્યોપાસકઃ
પરમકૌતુકં પ્રાપ । અખણ્ડપરિપૂર્ણપરમાનન્દલક્ષણ-
પરબ્રહ્મણઃ સમસ્તસ્વરૂપવિરોધકારિણ્યપરિચ્છિન્ન-
તિરસ્કરિણ્યાકારા વૈષ્ણવી મહાયોગમાયા મૂર્તિમદ્ભિરનન્ત-
મહામાયાજાલવિશેષૈઃ પરિષેવિતા તસ્યાઃ પુરમતિકૌતુક-
મત્યાશ્ચર્યસાગરાનન્દલક્ષણમમૃતં ભવતિ ।
અવિદ્યાસાગરપ્રતિબિમ્બિતનિત્યવૈકુણ્ઠપ્રતિવૈકુણ્ઠમિવ વિભાતિ ।
ઉપાસકસ્તત્પુરં પ્રાપ્ય યોગલક્ષ્મીમંગમાયાં ધ્યાત્વા
વિવિધોપચારૈરારાધ્ય તયા સમ્પૂજિતશ્ચાનુજ્ઞાત-
શ્ચોપર્યુપરિ ગત્વાનન્તમાયાવિલાસાનવલોક્યોપાસકઃ પરમકૌતુકં પ્રાપ ॥

તત ઉપરિ પાદવિભૂતિવૈકુણ્ઠપુરમાભાતિ ।
અત્યાશ્ચર્યાનન્તવિભૂતિસમષ્ટ્યાકાર-
માનન્દરસપ્રવાહૈરલઙ્કૃતમભિતસ્તરઙ્ગિણ્યાઃ
પ્રવાહૈરતિમઙ્ગલં બ્રહ્મતેજોવિશેષાકારૈરનન્ત-
બ્રહ્મવનૈરભિતસ્તતમનન્તનિત્યમુક્તૈરભિવ્યાપ્તમનન્ત-
ચિન્મયપ્રાસાદજાલસંકુલમનાદિપાદવિભૂતિવૈકુણ્ઠ-
મેવમાભાતિ । તન્મધ્યે ચ ચિદાનન્દાચલો વિભાતિ ॥

તદુપરિ જ્વલતિ નિરતિશયાનન્દદિવ્યતેજોરાશિઃ ।
તદભ્યન્તરે પરમાનન્દવિમાનં વિભાતિ ।
તદભ્યન્તરસંસ્થાને ચિન્મયાસનં વિરાજતે ।
તત્પદ્મકર્ણિકાયાં નિરતિશયદિવ્યતેજોરાશ્યન્તર-

સમાસીનમાદિનારાયણં ધ્યાત્વા વિવિધોપચારૈસ્તં
સમારાધ્ય તેનાભિપૂજિતસ્તદનુજ્ઞાતશ્ચોપર્યુપરિગત્વા
સાવરણમવિદ્યાણ્ડં ચ ભિત્ત્વા વિદ્યાપાદમુલ્લઙ્ઘ્ય
વિદ્યાવિદ્યયોઃ સન્ધૌ વિશ્વક્સેનવૈકુણ્ઠપુરમાભાતિ ॥

અનન્તદિવ્યતેજોજ્વાલાજાલૈરભિતોઽનીકં પ્રજ્વલન્તમનન્ત-
બોધાનન્તબોધાનન્દવ્યૂહૈરભિતસ્તતં શુદ્ધબોધ-
વિમાનાવલિભિર્વિરાજિતમનન્તાનન્દપર્વતૈઃ પરમકૌતુક-
માભાતિ । તન્મધ્યે ચ કલ્યાણાચલોપરિ શુદ્ધાનન્દ-
વિમાનં વિભાતિ । તદભ્યન્તરે દિવ્યમઙ્ગલાસનં વિરાજતે ।
તત્પદ્મકર્ણિકાયાં બ્રહ્મતેજોરાશ્યભ્યન્તરસમાસીનં
ભગવદનન્તવિભૂતિવિધિનિષેધપરિપાલકં સર્વપ્રવૃત્તિ-
સર્વહેતુનિમિત્તિકં નિરતિશયલક્ષણમહાવિષ્ણૂસ્વરૂપ-
મખિલાપવર્ગપરિપાલકમમિતવિક્રમમેવંવિધં વિશ્વક્સેનં
ધ્યાત્વા પ્રદક્ષિણનમસ્કારાન્વિધાય વિવિધોપચારૈરારાધ્ય
તદનુજ્ઞાતશ્ચોપર્યુપરિ ગત્વા વિદ્યાવિભૂતિં પ્રાપ્ય
વિદ્યામયાનન્તવૈકુણ્ઠાન્પરિતોઽવસ્થિતાન્બ્રહ્મતેજોમયા-
નવલોક્યોપાસકઃ પરમાનન્દં પ્રાપ ॥

વિદ્યામયાનનન્તસમુદ્રાનતિક્રમ્ય બ્રહ્મવિદ્યા-
તરઙ્ગિણીમાસાદ્ય તત્ર સ્નાત્વા ભગવદ્ધ્યાનપૂર્વકં
પુનર્નિમજ્જ્ય મન્ત્રમયશરીરમુત્સૃજ્ય વિદ્યાનન્દ-
મયામૃતદિવ્યશરીરં પરિગૃહ્ય નારાયણસારૂપ્યં
પ્રાપ્યાત્મપૂજાં વિધાય બ્રહ્મમયવૈકુણ્ઠવાસિભિઃ
સર્વૈર્નિત્યમુક્તૈઃ સુપૂજિતસ્તતો બ્રહ્મવિદ્યાપ્રવાહૈરાનન્દ-
રસનિર્ભરૈઃ ક્રીડાનન્તપર્વતૈરનન્તૈરભિવ્યાપ્તં
બ્રહ્મવિદ્યામહૈઃ સહસ્રપ્રાકારૈરાનન્દામૃતમયૈ-
ર્દિવ્યગન્ધસ્વભાવૈશ્ચિન્મયૈરનન્તબ્રહ્મવનૈરતિશોભિત-
મુપાસકસ્ત્વેવંવિધં બ્રહ્મવિદ્યાવૈકુણ્ઠમાવિશ્ય
તદભ્યન્તરસ્થિતાત્યન્તોન્નતબોધાનન્દપ્રાસાદાગ્રસ્થિત-
પ્રણવવિમાનોપરિસ્થિતામપારબ્રહ્મવિદ્યાસામ્રાજ્યાધિદેવતા-
મમોઘનિજમન્દકટાક્ષેણાનાદિમૂલાવિદ્યાપ્રલયકરીમદ્વિતીયા-
મેકામનન્તમોક્ષસામ્રાજ્યલક્ષ્મીમેવં ધ્યાત્વા

પ્રદક્ષિણનમસ્કારાન્વિધાય વિવિધોપચારૈરારાધ્ય
પુષ્પાઞ્જલિં સમર્પ્ય સ્તુત્વા સ્તોત્રવિશેષૈસ્તયાભિપૂજિત-
સ્તદનુગતશ્ચોપર્યુપરિ ગત્વા બ્રહ્મવિદ્યાતીરે ગત્વા
બોધાનન્દમયાનનન્તવૈકુણ્ઠાનવલોક્ય નિરતિશયાનન્દં પ્રાપ્ય
બોધાનન્દમયાનનન્તસમુદ્રાનતિક્રમ્ય ગત્વાગત્વા બ્રહ્મવનેષુ
પરમમઙ્ગલાચલશ્રોણીષુ તતો બોધાનન્દવિમાનપરમ્પરા-
સૂપાસકઃ પરમાનન્દં પ્રાપ ॥

તતઃ શ્રીતુલસીવૈકુણ્ઠપુરમાભાતિ પરમકલ્યાણમનન્ત-
વિભવમમિતતેજોરાશ્યાકારમનન્તબ્રહ્મતેજોરાશિ-
સમષ્ટ્યાકારં ચિદાનન્દમયાનેકપ્રાકારવિશેષૈઃ
પરિવેષ્ટિતમમિતબોધાનન્દાચલોપરિસ્થિતં બોધાનન્દ-
તરઙ્ગિણ્યાઃ પ્રવાહૈરતિમઙ્ગલં નિરતિશયાનન્દૈરનન્ત-
વૃન્દાવનૈરતિશોભિતમખિલપવિત્રાણાં પરમપવિત્રં
ચિદ્રૂપૈરનન્તનિત્યમુક્તૈરભિવ્યાપ્તમાનન્દમયાનન્ત-
વિમાનજલૈરલઙ્કૃતમમિતતેજોરાશ્યન્તર્ગતદિવ્યતેજોરાશિ-
વિશેષમુપાસકસ્ત્વેવમાકારં તુલસીવૈકુણ્ઠં પ્રવિશ્ય
તદન્તર્ગતદિવ્યવિમાનોપરિસ્થિતાં સર્વપરિપૂર્ણસ્ય મહાવિષ્ણોઃ
સર્વાઙ્ગેષુ વિહારિણીં નિરતિશયસૌન્દર્યલાવણ્યાધિદેવતાં
બોધાનન્દમયૈરનન્તનિત્યપરિજનૈઃ પરિષેવિતાં શ્રીસખીં
તુલસીમેવં લક્ષ્મીં ધ્યાત્વા પ્રદક્ષિણનમસ્કારાન્વિધાય
વિવિધોપચારૈરારાધ્ય સ્તુત્વા સ્તોત્રવિશેષૈસ્તયાભિપૂજિત-
સ્તદનુજ્ઞાતશ્ચોપર્યુપરિગત્વા પરમાનન્દતરઙ્ગિણ્યાસ્તીરે
ગત્વા તત્ર પરિતોઽવસ્થિતાઞ્છુદ્ધબોધાનન્દમયાનનન્ત-
વૈકુણ્ઠાનવલોક્ય નિરતિશયાનન્દં પ્રાપ્ય તત્રૈત્યૈશ્ચિદ્રૂપૈઃ
પુરાણપુરુષૈશ્ચાભિપૂજિતસ્તતો ગત્વાગત્વા બ્રહ્મવનેષુ
દિવ્યગન્ધાનન્દપુષ્પવૃષ્ટિભિઃ સમન્વિતેષુ દિવ્ય-
મઙ્ગલાલયેષુ નિરતિશયાનન્દામૃતસાગરેષ્વમિતતેજો-
રાશ્યાકારેષુ કલ્લોલવનસંકુલેષુ તતોઽનન્તશુદ્ધબોધ-
વિમાનજાલસંકુલાનન્દાચલશ્રોણીષૂપાસકસ્તત ઉપર્યુપરિ
ગત્વા વિમાનપરમ્પરાસ્વનન્તતેજઃપર્વતરાજિષ્વેવં ક્રમેણ
પ્રાપ્ય વિદ્યાનન્દમયોઃ સન્ધિં તત્રાનદતરઙ્ગિણ્યાઃ પ્રવાહેષુ સ્નાત્વા

બોધાનન્દવનં પ્રાપ્ય શુદ્ધબોધપરમાનન્દાનન્દાકારવનં
સન્તતામૃતપુષ્પવૃષ્ટિભિઃ પરિવેષ્ટિતં
પરમાનન્દપ્રવાહૈરભિવ્યાપ્તં મૂર્તિમદ્ભિઃ
પરમમઙ્ગલૈઃ પરમકૌતુકમપરિચ્છિન્નાનન્દ-
સાગરાકારં ક્રીડાનન્દપર્વતૈરભિશોભિતં તન્મધ્યે ચ
શુદ્ધબોધાનન્દવૈકુણ્ઠં યદેવ બ્રહ્મવિદ્યાપાદવૈકુણ્ઠં
સહસ્રાનન્દપ્રાકારૈઃ સમુજ્જ્વલતિ ।
અનન્તાનન્દવિમાનજાલસંકુલમનન્તબોધસૌધ-
વિશેષૈરભિતોઽનિશં પ્રજ્વલન્તં ક્રીડાનન્તમણ્ડપ-
વિશેષૈર્વિશેષિતં બોધાનન્દમયાનન્તપરમચ્છત્ર-
ધ્વજચામરવિતાનતોરણૈરલઙ્કૃતં
પરમાનન્દવ્યૂહૈર્નિત્યમુક્તૈરભિતસ્તતમનન્તદિવ્યતેજઃપર્વત-
સમષ્ટ્યાકારમપરિચ્છિન્નાનન્તશુદ્ધબોધાનન્તમણ્ડલં
વાચામગોચરાનન્દબ્રહ્મતેજોરાશિમણ્ડલમાખણ્ડલવિશેષં
શુદ્ધાનન્દસમષ્ટિમણ્ડલવિશેષમખણ્ડચિદ્ઘનાનન્દ-
વિશેષમેવં તેજોમણ્ડલવિધં બોધાનન્દવૈકુણ્ઠમુપાસકઃ
પ્રવિશ્ય તત્રત્યૈઃ સર્વૈરભિપૂજિતઃ પરમાનન્દાચલોપર્યખણ્ડ-
બોધવિમાનં પ્રજ્વલતિ । તદભ્યન્તરે ચિન્મયાસનં વિરાજતે ।
તદુપરિ વિભાત્યખણ્ડાનન્દતેજોમણ્ડલમ્ । તદભ્યન્તરે સમાસીન-
માદિનારાયણં ધ્યાત્વા પ્રદક્ષિણનમસ્કારાન્વિધાય
વિવિધોપચારૈઃ સુસમ્પૂજ્ય પુષ્પાઞ્જલિં સમર્પ્ય સ્તુત્વા
સ્તોત્રવિશેષૈઃ સ્વરૂપેણાવસ્થિતમુપાસકમવલોક્ય તમુપાસક-
માદિનારાયણઃ સ્વસિંહાસને સુસંસ્થાપ્ય તદ્વૈકુણ્ઠવાસિભિઃ
સર્વૈઃ સમન્વિતઃ સમસ્તમોક્ષસામ્રાજ્યપટ્ટાભિષેકમુદ્દિશ્ય
મન્ત્રપૂતૈરપાસકમાનન્દકલશૈરભિષિચ્ય દિવ્યમઙ્ગલ-
મહાવાદ્યપુરઃસરં વિવિધોપચારૈરભ્યર્ચ્ય મૂર્તિમદ્ભિઃ
સર્વૈઃ સ્વચિહ્નૈરલઙ્કૃત્ય પ્રદક્ષિણનમસ્કારાન્વિધાય
ત્વં બ્રહ્માસિ અહં બ્રહ્માસ્મિ આવયોરન્તરં ન વિદ્યતે ત્વમેવાહં
અહમેવત્વં ઇત્યભિધાયેત્યુક્ત્વાદિનારાયણસ્તિરોદધે તદેત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ પરમમોક્ષમાર્ગસ્વરૂપનિરૂપણં
નામ ષષ્ઠોધ્યાયઃ ॥ ૬॥

અથોપાસકસ્તદાજ્ઞયા નિત્યં ગરુડમારુહ્ય
વૈકુણ્ઠવાસિભિઃ સર્વૈઃ પરિવેષ્ટિતો મહાસુદર્શનં
પુરસ્કૃત્ય વિશ્વક્સેનપરિપાલિતશ્ચોપર્યુપરિ ગત્વા
બ્રહ્માનન્દવિભૂતિં પ્રાપ્ય સર્વત્રાવસ્થિતાબ્રહ્માનન્દ-
મયાનનન્તવૈકુણ્ઠાનવલોક્ય નિરતિશયાનન્દસાગરો
ભૂત્વાત્મારામાનન્દવિભૂતિપુરુષાનનન્તાનવલોક્ય
તાન્સર્વાનુપચારૈઃ સમભ્યર્ચ્ય તૈઃ સર્વૈરભિપૂજિત-
શ્ચોપાસકસ્તત ઉપર્યુપરિ ગત્વા બ્રહ્માનન્દવિભૂતિં
પ્રાપ્યાનન્તદિવ્યતેજઃપર્વતૈરલઙ્કૃતાન્પરમાનન્દ-
લહરીવનશોભિતાનસંખ્યાકાનાનન્દસમુદ્રાનતિક્રમ્ય
વિવિધવિચિત્રાનન્તપરમતત્ત્વવિભૂતિસમષ્ટિવિશેષા-
ન્પરમકૌતુકાન્બ્રહ્માનન્દવિભૂતિવિશેષનતિક્રમ્યોપાસકઃ
પરમકૌતુકં પ્રાપ ।
તતઃ સુદર્શનવૈકુણ્ઠપુરમાભાતિ નિત્યમઙ્ગલમનન્તવિભવં
સહસ્રાનન્દપ્રકારપરિવેષ્ટિતમયુતકુક્ષ્યુપલક્ષિત-
મનન્તોત્કટજ્વલદરમણ્ડલં નિરતિશયદિવ્યતેજોમણ્ડલં
વૃન્દારકપરમાનન્દં શુદ્ધબુદ્ધસ્વરૂપમનન્તાનન્દ-
સૌદામિનીપરમવિલાસં નિરતિશયપરમાનન્દપારાવાર-
મનન્તૈરાનન્દપુરુષૈશ્ચિદ્રૂપૈરધિષ્ઠિતમ્ । તન્મધ્યે ચ
સુદર્શનં મહાચક્રમ્ । ચરણં પવિત્રં વિતતં પુરાણં
યેન પૂતસ્તરતિ દુષ્કૃતાનિ । તેન પવિત્રેણ શુદ્ધેન પૂતા
અતિપાપ્માનમરાતિં તરેમ । લોકસ્ય દ્વારમર્ચિમત્પવિત્રમ્ ।
જ્યોતિષ્મદ્ભ્રાજમાનં મહસ્વત્ । અમૃતસ્ય ધારા બહુધા
દોહમાનમ્ । ચરણં નો લોકે સુધિતાં દધાતુ । અયુતારં
જ્વલન્તમયુતારસમષ્ટ્યાકરં નિરતિશયવિક્રમવિલાસમનન્ત-
દિવ્યાયુધદિવ્યશક્તિસમષ્ટિરૂપં મહાવિષ્ણોરનર્ગલપ્રતાપ-
વિગ્રહમયુતાયુતકોટિયોજનવિશાલમનન્તજ્વાલજાલૈરલઙ્કૃતં
સમસ્તદિવ્યમઙ્ગલનિદાનમનન્તદિવ્યતીર્થાનાં નિજમન્દિરમેવં
સુદર્શનં મહાચક્રં પ્રજ્વલતિ ।
તસ્ય નાભિમણ્ડલસંસ્થાને ઉપલક્ષ્યતે નિરતિશયાનન્દ-
દિવ્યતેજોરાશિઃ । તન્મધ્યે ચ સહસ્રારચક્રં પ્રજ્વલતિ ।
તદખણ્ડદિવ્યતેજોમણ્ડલાકારં પરમાનન્દસૌદામિની-

નિચયોજ્જ્વલમ્ । તદભ્યન્તરસંસ્થાને ષટ્શતારચક્રં
પ્રજ્વલતિ । તસ્યામિતપરમતેજઃ પરમવિહારસંસ્થાનવિશેષં
વિજ્ઞાનઘનસ્વરૂપમ્ । તદન્તરાલે ત્રિશતારચક્રં વિભાતિ ।
તચ્ચ પરમકલ્યાણવિલાસવિશેષમનન્તચિદાદિત્યસમષ્ટ્યાકરમ્ ।
તદભ્યન્તરે શતારચક્રમાભાતિ । તચ્ચ પરમતેજોમણ્ડલ-
વિશેષમ્ । તન્મધ્યે ષષ્ટ્યરચક્રમાભાતિ । તચ્ચ
બ્રહ્મતેજઃપરમવિલાસવિશેષમ્ । તદભ્યન્તરસંસ્થાને
ષટ્કોણચક્રં પ્રજ્વલતિ । તચ્ચાપરિચ્છિન્નાનન્તદિવ્યતેજોરાશ્યાકરમ્ ।
તદભ્યન્તરે મહાનન્દપદં વિભાતિ । તત્કર્ણિકાયાં
સૂર્યેન્દુવહ્નિમણ્ડલાનિ ચિન્મયાનિ જ્વલન્તિ । તત્રોપલક્ષ્યતે
નિરતિશયદિવ્યતેજોરાશિઃ । તદભ્યન્તરસંસ્થાને યુઅગપદુદિતા-
નન્તકોટિરવિપ્રકાશઃ સુદર્શનપુરુષો વિરાજતે । સુદર્શનપુરુષો
મહાવિષ્ણુરેવ । મહવિષ્ણોઃ સમસ્તાસાધારણચિહ્નચિહ્નિતઃ ।
એવમુપાસકઃ સુદર્શનપુરુષ ધ્યાત્વા વિવિધોપચારૈરારાધ્ય
પ્રદક્ષિણનમસ્કારાન્વિધાયોપાસકસ્તેનાભિપૂજિતસ્તદનુજ્ઞાત-
શ્ચોપર્યુપરિ ગત્વા પરમાનન્દમયાનન્તવૈકુણ્ઠાનવલોક્યોપાસકઃ
પરમાનન્દં પ્રાપ । તત ઉપરિ વિવિધવિચિત્રાનન્તચિદ્વિલાસવિભૂતિ-
વિશેષાનતિક્રમ્યાનન્તપરમાનન્દવિભૂતિસમષ્ટિવિશેષાનન્ત-
નિરતિશયાનન્તસમુદ્રાનતીત્યોપાસકઃ ક્રમેણાદ્વૈતસંસ્થાનં પ્રાપ ॥

કથમદ્વૈતસંસ્થાનમ્ । અખણ્ડાનન્દસ્વરૂપ-
મનિર્વાચ્યમતિબોધસાગરમમિતાનન્દસમુદ્રં
વિજાતીયવિશેષવિવર્જિતં સજાતીયવિશેષવિશેષિતં
નિરવયવં નિરાધારં નિર્વિકારં નિરઞ્જનમનન્ત-
બ્રહ્માનન્દસમષ્ટિકન્દં પરમચિદ્વિલાસ-
સમષ્ટ્યાકારં નિર્મલં નિરવદ્યં નિરાશ્રય-
મતિનિર્મલાનન્તકોટિરવિપ્રકાશૈકસ્ફુલિઙ્ગમન-
ન્તોપનિષદર્થસ્વરૂપમખિલપ્રમાણાતીતં
મનોવાચામગોચરં નિત્યમુક્તસ્વરૂપમનાધાર-
માદિમધ્યાન્તશૂન્યં કૈવલ્યં પરમં શાન્તં
સૂક્ષ્મતરં મહતો મહત્તરમપરિમિતાનન્દવિશેષં
શુદ્ધબોધાનન્દવિભૂતિવિશેષમનન્તાનન્દવિભૂતિ-

વિશેષસમષ્ટિરૂપમક્ષરમનિર્દેશ્યં કૂટસ્થ-
મચલં ધ્રુવમદિગ્દેશકાલમન્તર્બહિશ્ચ તત્સર્વં
વ્યાપ્ય પરિપૂર્ણં પરમયોગિભિર્વિમૃગ્યં દેશતઃ
કાલતો વસ્તુતઃ પરિચ્છેદરહિતં નિરન્તરાભિનવં
નિત્યપરિપૂર્ણમખણ્ડાનન્દામૃતવિશેષં શાશ્વતં
પરમં પદં નિરતિશયાનન્દાનન્તતટિત્પર્વતાકાર-
મદ્વિતીયં સ્વયમ્પ્રકાશમનિશં જ્વલતિ । પરમાનન્દ-
લક્ષણાપરિચ્છિન્નાનન્તપરંજ્યોતિઃ શાશ્વતં શશ્વદ્વિભાતિ ।
તદભ્યન્તરસંસ્થાનેઽમિતાનન્દચિદ્રૂપાચલ-
મખણ્ડપરમાનન્દવિશેષં બોધાનન્દમહોજ્જ્વલં
નિત્યમઙ્ગલમન્દિરં ચિન્મથનાવિર્ભૂતં
ચિત્સારમનન્તાશ્ચર્યસાગરમમિતતેજોરાશ્યન્તર્ગત-
તેજોવિશેષમનન્તાનન્દપ્રવાહૈરલઙ્કૃતં
નિરતિશયાનન્દપારાવારાકારં નિરુપમનિત્યનિરવદ્ય-
નિરતિશયનિરવધિકતેજોરાશિવિશેષં નિરતિશયાનન્દ-
સહસ્રપ્રાકારૈરલઙ્કૃતં શુદ્ધબોધસૌધાવલિ-
વિશેષૈરલઙ્કૃતં ચિદાનન્દમયાનન્તદિવ્યારામૈઃ
સુશોભિતં શશ્વદમિતપુષ્પવૃષ્ટિભિઃ સમન્તતઃ
સન્તતમ્ । તદેવ ત્રિપાદ્વિભૂતિ વૈકુણ્ઠસ્થાનં તદેવ
પરમકૈવલ્યમ્ । તદેવાબાધિતપરમતત્ત્વમ્ । તદેવાનન્તો-
પનિષદ્વિમૃગ્યમ્ । તદેવ પરમયોગિભિર્મુમુક્ષિભિઃ
સર્વૈરાશાસ્યમાનમ્ । તદેવ સદ્ઘનમ્ । તદેવ ચિદ્ઘનમ્ ।
તદેવાનન્દઘનમ્ । તદેવ શુદ્ધબોધઘનવિશેષ-
મખણ્ડાનન્દબ્રહ્મચૈતન્યાધિદેવતાસ્વરૂપમ્ ।
સર્વાધિષ્ઠાનમદ્વયપરબ્રહ્મવિહારમણ્ડલં
નિરતિશયાનન્દતેજોમણ્ડલમદ્વૈતપરમાનન્દલક્ષણ-
પરબ્રહ્મણઃ પરમાધિષ્ઠાનમણ્ડલં નિરતિશય-
પરમાનન્દપરમમૂર્તિવિશેષમણ્ડલમનન્તપરમ-
મૂર્તિસમષ્ટિમણ્ડલં નિરતિશયપરમાનન્દલક્ષણ-
પરબ્રહ્મણઃ પરમમૂર્તિપરમતત્ત્વવિલાસવિશેષમણ્ડલં
બોધાનન્દમયાનન્તપરમવિલાસવિભૂતિવિશેષસમષ્ટિ-
મણ્ડલમનન્તચિદ્વિલાસવિભૂતિવિશેષસમષ્ટિમણ્ડલ-

મખણ્ડશુદ્ધચૈતન્યનિજમૂર્તિવિશેષવિગ્રહં
વાચામગોચરાનન્તશુદ્ધબોધવિશેષવિગ્રહમનન્તાનન્દ-
સમુદ્રસમષ્ટ્યાકારમનન્તબોધાચલૈરધિષ્ઠિતં
નિરતિશયાનન્દપરમમઙ્ગલવિશેષસમષ્ટ્યાકાર-
મખણ્ડાદ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મણઃ પરમમૂર્તિ-
પરમતેજઃપુઞ્જપિણ્ડવિશેષં ચિદ્રૂપાદિત્યમણ્ડલં
દ્વાત્રિંશદ્વ્યૂહભેદૈરધિષ્ઠિતમ્ ।
વ્યૂહભેદાશ્ચ કેશવાદિચતુર્વિંશતિઃ ।
સુદર્શનાદિન્યાસમન્ત્રાઃ । સુદર્શનાદિ યન્ત્રોદ્ધારઃ ।
અનન્તગરુડવિશ્વક્સેનાશ્ચ નિરતિશયાનન્દાશ્ચ ।
આનન્દવ્યૂહમધ્યે સહસ્રકોટિયોજનાયતોન્નત-
ચિન્મયપ્રાસાદં બ્રહ્માનન્દમયવિમાનકોટિભિ-
રતિમઙ્ગલમનન્તોપનિષદર્થારામજાલસંકુલં
સામહંસકૂજિતૈરતિશોભિતમાનન્દમયાનન્તશિખરૈ-
રલઙ્કૃતં ચિદાનન્દરસનિર્ઝરૈરભિવ્યાપ્તમખણ્ડા-
નન્દતેજોરાશ્યન્તરસ્થિતમનન્તાનન્દાશ્ચર્યસાગરં
તદભ્યન્તરસંસ્થાનેઽનન્તકોટિરવિપ્રકાશાતિશય-
પ્રાકારં નિરતિશયાનન્દલક્ષણં પ્રણવાખ્યં
વિમાનં વિરાજતે । શતકોટિશિખરૈરાનન્દમયૈઃ
સમુજ્જ્વલતિ । તદન્તરાલે બોધાનન્દાચલોપર્યષ્ટાક્ષરી-
મણ્ટપો વિભાતિ । તન્મધ્યે ચ ચિદાનન્દમયવેદિકાનન્દ-
વનવિભૂષિતા । તદુપરિ જ્વલતિ નિરતિશયાનન્દતેજોરાશિઃ ।
તદભ્યન્તરસંસ્થાનેઽષ્ટાક્ષરીપદ્મવિભૂષિતં
ચિન્મયાસનં વિરાજતે । પ્રણવકર્ણિકાયાં સૂર્યેન્દુ-
વહ્નિમણ્ડલાનિ ચિન્મયાનિ જ્વલન્તિ । તત્રાખણ્ડાનન્દ-
તેજોરાશ્યન્તર્ગતં પરમમઙ્ગલાકારમનન્તાસનં
વિરાજતે । તસ્યોપરિ ચ મહાયન્ત્રં પ્રજ્વલતિ । નિરતિશય-
બ્રહ્માનન્દપરમમૂર્તિમહાયન્ત્રં સમસ્તબ્રહ્મ-
તેજોરાશિસમષ્ટિરૂપં ચિત્સ્વરૂપં નિરઞ્જનં પરબ્રહ્મ-
સ્વરૂપં પરબ્રહ્મણઃ પરમરહસ્યકૈવલ્યં મહાયન્ત્રમય-
પરમવૈકુણ્ઠનારાયણયન્ત્રં વિજયતે । તત્સ્વરૂપં કથમિતિ ।
દેશિકસ્તથેતિ હોવાચ । આદૌ ષટ્કોણચક્રમ્ । તન્મધ્યે

ષટ્દલપદ્મમ્ । તત્કર્ણિકાયાં પ્રણવ ૐઇતિ । પ્રણવમધ્યે
નારાયણબીજમિતિ । તત્સાધ્યગર્ભિતં મમ સર્વાભીષ્ટસિદ્ધિં
કુરુકુરુ સ્વાહેતિ । તત્પદ્મદલેષુ વિષ્ણુનૃસિંહષડક્ષર-
મન્ત્રૌ ૐ નમો વિષ્ણવે ઐં ક્લીં શ્રીં હ્રીં ક્ષ્મ્ૌં ફટ્ ।
તદ્દલકપોલેષુ રામકૃષ્ણષડક્ષરમન્ત્રૌ । રાં
રામાય નમઃ । ક્લીં કૃષ્ણાય નમઃ । ષટ્કોણેષુ
સુદર્શનષડક્ષરમન્ત્રઃ । સહસ્રાર હું ફડિતિ । ષટ્કોણ-
કપોલેષુ પ્રણવયુક્તશિવપઞ્ચાક્ષરમન્ત્રઃ । ૐ નમઃ
શિવાયેતિ । તદ્બહિઃ પ્રણવમાલાયુક્તં વૃત્તમ્ । વૃત્તાદ્બહિ-
રષ્ટદલપદ્મમ્ । તેષુ દલેષુ નારાયણનૃસિંહ-
અષ્ટાક્ષરમન્ત્રૌ । ૐ નમો નારાયણાય । જયજય નરસિંહ ।
તદ્દલસન્ધિષુ રામકૃષ્ણશ્રીકરાષ્ટાક્ષરમન્ત્રાઃ ।
ૐ રામાય હું ફટ્ સ્વાહા । ક્લીં દામોદરાય નમઃ ।
ઉત્તિષ્ઠ શ્રીકરસ્વાહા । તદ્બહિઃ પ્રણવમાલાયુક્તં વૃત્તમ્ ।
વૃત્તદ્બહિર્નવદલપદ્મમ્ । તેષુ દલેષુ રામકૃષ્ણ-
હયગ્રીવનવાક્ષરમન્ત્રાઃ । ૐ રામચન્દ્રાય નમ્ૐ ।
ક્લીં કૃષ્ણાય ગોવિન્દાય ક્લીમ્ । હ્લૌં હયગ્રીવાય નમો
હ્લૌં । તદ્દલકપોલેષુ દક્ષિણામૂર્તિરીશ્વરમ્ । તદ્બહિ-
ર્નારાયણબીજયુક્તં વૃત્તમ્ । વૃત્તદ્બહિર્દશદલપદ્મમ્ ।
તેષુ દલેષુ રામકૃષ્ણદશાક્ષરમન્ત્રૌ । હું જાનકી-
વલ્લભાય સ્વાહા । ગોપીજનવલ્લભાય સ્વાહા । તદ્દલસન્ધિષુ
નૃસિંહમાલામન્ત્રઃ । ૐ નમો ભગવતે શ્રીમહાનૃસિંહાય
કરાલદંષ્ટ્રવદનાય મમ વિઘ્નાત્પચપચ સ્વાહા ।
તદ્બહિર્નૃસિંહૈકાક્ષરયુક્તં વૃત્તમ્ । ક્ષ્મ્ૌં ઇત્યેકાક્ષરમ્ ।
વૃત્તાદ્બહિર્દ્વાદશદલપદ્મમ્ । તેષુ દલેષુ નારાયણ-
વાસુદેવદ્વાદશાક્ષરમન્ત્રૌ । ૐ નમો ભગવતે નારાયણાય ।
ૐ નમો ભગવતે વાસુદેવાય । તદ્દલકપોલેષુ મહાવિષ્ણુ-
રામકૃષ્ણદ્વાદશાક્ષરમન્ત્રાશ્ચ । ૐ નમો ભગવતે
મહાવિષ્ણવે । ૐ હ્રીં ભરતાગ્રજ રામ ક્લીં સ્વાહા ।
શ્રીં હ્રીં ક્લીં કૃષ્ણાય ગોવિન્દાય નમઃ । તદ્બહિર્જગન્મોહન-
બીજયુક્તં વૃત્તં ક્લીં ઇતિ । વૃત્તદ્બહિશ્ચતુર્દશદલપદ્મમ્ ।
તેષુ દલેષુ લક્ષ્મીનારાયણહયગ્રીવગોપાલદધિવામન-

મન્ત્રાશ્ચ । ૐ હ્રીં હ્રીં શ્રીં શ્રીં લક્ષ્મીવાસુદેવાય નમઃ ।
ૐ નમઃ સર્વકોટિસર્વવિદ્યારાજાય ક્લીં કૃષ્ણાય
ગોપાલચૂડામણયે સ્વાહા । ૐ નમો ભગવતે દધિવામનાય ૐ ।
તદ્દલસન્ધિષ્વન્નપૂર્ણેશ્વરીમન્ત્રઃ । હ્રીં પદ્માવત્યન્નપૂર્ણે
માહેશ્વરી સ્વાહા । તદ્બહિઃ પ્રણવમાલાયુક્તં વૃત્તમ્ ।
વૃત્તાદ્બહિઃ ષોડશદલપદ્મમ્ । તેષુ દલેષુ શ્રીકૃષ્ણ-
સુદર્શનષોડશાક્ષરમન્ત્રૌ ચ । ૐ નમો ભગવતે
રુક્મિણીવલ્લભાય સ્વાહા । ૐ નમો ભગવતે મહાસુદર્શનાય
હું ફટ્ । તદ્દલસન્ધિષુ સ્વરાઃ સુદર્શનમાલામન્ત્રાશ્ચ ।
અ આ ઇ ઈ ઉ ઊ ઋ ૠ ઌ ૡ એ ઐ ઓ ઔ અં અઃ ।
સુદર્શનમહાચક્રાય દીપ્તરૂપાય સર્વતો
માં રક્ષરક્ષ સહસ્રાર હું ફટ્ સ્વાહા ।
તદ્બહિર્વરાહબીજયુક્તં વૃત્તમ્ । તદ્ધુમિતિ ।
વૃત્તદ્બહિરષ્ટાદશદલપદ્મમ્ ।
તેષુ દલેષુ શ્રીકૃષ્ણવામનાષ્ટાદશાક્ષરમન્ત્રૌ ।
ક્લીં કૃષ્ણાય ગોવિન્દાય ગોપીજનવલ્લભાય સ્વાહા ।
ૐ નમો વિષ્ણવે સુરપતયે મહાબલાય સ્વાહા ।
તદ્દલકપોલેષુ ગરુડપઞ્ચાક્ષરીમન્ત્રો ગરુડમાલામન્ત્રશ્ચ ।
ક્ષિપ ૐ સ્વાહા । ૐ નમઃ પક્ષિરાજાય સર્વવિષભૂતરક્ષઃ-
કૃત્યાદિભેદનાય સર્વેષ્ટસાધકાય સ્વાહા ।
તદ્બહિર્માયાબીજયુક્તં વૃત્તમ્ । વૃત્તદ્બહિઃ પુનરષ્ટદલપદ્મમ્ ।
તેષુ દલેષુ શ્રીકૃષ્ણવામનાષ્ટાક્ષરમન્ત્રૌ ।
ૐ નમો દામોદરાય । ૐ વામનાય નમઃ ૐ ।
તદ્દલકપોલેષુ નીલકણ્ઠત્ર્યક્ષરીગરુડપઞ્ચાક્ષરીમન્ત્રૌ ચ ।
પ્રેં રીં ઠઃ । નમોઽણ્ડજાય । તદ્બહિર્મન્મથબીજયુક્તં વૃત્તમ્ ।
વૃત્તદ્બહિશ્ચતુર્વિંશતિદલપદ્મમ્ । તેષુ દલેષુ શરણાગત-
નારાયણમન્ત્રૌ નારાયણહયગ્રીવગાયત્રી મન્ત્રૌ ચ ।
શ્રીમન્નારાયણચરણૌ શરણં પ્રપદ્યે શ્રીમતે નારાયણાય નમઃ ।
નારાયાણાય વિદ્મહે વાસુદેવાય ધીમહિ ।
તન્નો વિષ્ણુઃ પ્રચોદયાત્ ।
વાગીશ્વરાય વિદ્મહે હયગ્રીવાય ધીમહિ ।
તન્નો હંસઃ પ્રચોદયાત્ ।

તદ્દલકપોલેષુ નૃસિંહસુદર્શનગાયત્રીમન્ત્રાશ્ચ ।
વજ્રનખાય વિદ્મહે તીક્ષ્ણદંષ્ટ્રાય ધીમહિ ।
તન્નો નૃસિંહઃ પ્રચોદયાત્ ।
સુદર્શનાય વિદ્મહે હેતિરાજાય ધીમહિ ।
તન્નશ્ચક્રઃ પ્રચોદયાત્ ।
તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ।
ધિયો યો નઃ પ્રચોદયાત્ ।
તદ્બહિર્હયગ્રીવૈકાક્ષરયુક્તં વૃત્તં હ્લોહ્સૌમિતિ ।
વૃત્તાદ્બહિર્દ્વાત્રિંશદ્દલપદ્મમ્ ।
તેષુ દલેષુ નૃસિંહહયગ્રીવાનુષ્ટુભમન્ત્રૌ ઉગ્રં
વીરં મહાવિષ્ણું જ્વલન્તં સર્વતોમુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ ।
ઋગ્યજુઃસામરૂપાય વેદાહરણકર્મણે ।
પ્રણવોદ્ગીથવપુષે મહાશ્વશિરસે નમઃ ।
તદ્દલકપોલેષુ રામકૃષ્ણાનુષ્ટુભમન્ત્રૌ ।
રામભદ્ર મહેશ્વાસ રઘુવીર નૃપોત્તમ ।
ભો દશાસ્યાન્તકાસ્માકં રક્ષાં દેહિ શ્રિયં ચ મે ।
દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ।
તદ્બહિઃ પ્રણવસમ્પુટિતાગ્નિબીજયુક્તં વૃત્તમ્ ।
ૐ રમોમિતિ । વૃત્તદ્બહિઃ ષટ્ત્રિંશદ્દલપદ્મમ્ ।
તેષુ દલેષુ હયગ્રીવષટ્ત્રિંશદક્ષરમન્ત્રઃ
પુનરષ્ટત્રિંશદક્ષર મન્ત્રશ્ચ । હંસઃ ।
વિશ્વોત્તીર્ણસ્વરૂપાય ચિન્મયાનન્દરૂપિણે ।
તુભ્યં નમો હયગ્રીવ વિદ્યારાજાય વિષ્ણવે । સોઽહમ્ ।
હ્લૌં ૐ નમો ભગવતે હયગ્રીવાય સર્વવાગીશ્વરેશ્વરાય
સર્વવેદમયાય સર્વવિદ્યાં મે દેહિ સ્વાહા ।
તદ્દલકપોલેષુ પ્રણવાદિનમોન્તાશ્ચ તુર્થ્યન્તાઃ
કેશવાદિચતુર્વિંશતિમન્ત્રાશ્ચ ।
અવશિષ્ટદ્વાદશસ્થાનેષુ રામકૃષ્ણગાયત્રીદ્વયવર્ણચતુષ્ટયમેકૈકસ્થલે ।
ૐ કેશવાય નમઃ । ૐ નારાયણાય નમઃ ।
ૐ માધવાય નમઃ । ૐ ગોવિન્દાય નમઃ ।

ॐ વિષ્ણવે નમઃ । ॐ મધુસૂદનાય નમઃ ।
ॐ ત્રિવિક્રમાય નમઃ । ॐ વામનાય નમઃ ।
ॐ શ્રીધરાય નમઃ । ॐ હૃષીકેશાય નમઃ ।
ॐ પદ્મનાભાય નમઃ । ॐ દામોદરાય નમઃ ।
ॐ સઙ્કર્ષણાય નમઃ । ॐ વાસુદેવાય નમઃ ।
ॐ પ્રદ્યુમ્નાય નમઃ । ॐ અનિરુદ્ધાય નમઃ ।
ॐ પુરુષોત્તમાય નમઃ । ॐ અધોક્ષજાય નમઃ ।
ॐ નારસિંહાય નમઃ । ॐ અચ્યુતાય નમઃ ।
ॐ જનાર્દનાય નમઃ । ॐ ઉપેન્દ્રાય નમઃ ।
ॐ હરયે નમઃ । ॐ શ્રીકૃષ્ણાય નમઃ ।
દાશરથાય વિદ્મહે સીતાવલ્લભાય ધીમહિ ।
તન્નો રામઃ પ્રચોદયાત્ ।
દામોદરાય વિદ્મહે વાસુદેવાય ધીમહિ ।
તન્નઃ કૃષ્ણઃ પ્રચોદયાત્ ।
તદ્બહિઃ પ્રણવસમ્પુટિતાઙ્કુશબીજયુક્તં વૃત્તમ્ । ॐ ક્રોમિતિ ।
તદ્બહિઃ પુનર્વૃત્તં તન્મધ્યે દ્વાદશકુક્ષિસ્થાનાનિ સાન્તરાલાનિ ।
તેષુ કૌસ્તુભવનમાલાશ્રીવત્સસુદર્શનગરુડપદ્મ-
ધ્વજાનન્તશાર્ઙ્ગગદાશઙ્ખનન્દકમન્ત્રાઃ પ્રણવાદિ-
નમઓન્તાશ્ચતુર્થ્યન્તાઃ ક્રમેણ ।
ॐ કૌસ્તુભાય નમઃ । ॐ વનમાલાય નમઃ ।
ॐ શ્રીવત્સાય નમઃ । ॐ સુદર્શનાય નમઃ ।
ॐ ગરુડાય નમઃ । ॐ પદ્માય નમઃ ।
ॐ ધ્વજાય નમઃ । ॐ અનન્તાય નમઃ ।
ॐ શાર્ઙ્ગાય નમઃ । ॐ ગદાયૈ નમઃ ।
ॐ શઙ્ખાય નમઃ । ॐ નન્દકાય નમઃ ।
તદન્તરાલેષુ—-ॐ વિશ્વક્સેનાય નમઃ ।
ॐઆચક્રાય સ્વાહા । ॐ વિચક્રાય સ્વાહા ।
ॐ સુચક્રાય સ્વાહા । ॐ ધીચક્રાય સ્વાહા ।
ॐ સંચક્રાય સ્વાહા । ॐ જ્વાલચક્રાય સ્વાહા ।
ॐ ક્રુદ્ધોલ્કાય સ્વાહા । ॐ મહોલ્કાય સ્વાહા ।
ॐ વીર્યોલ્કાય સ્વાહા । ॐ દ્યુલ્કાય સ્વાહા ।
ॐ સહસ્રોલ્કાય સ્વાહા । ઇતિ પ્રણવાદિ મન્ત્રાઃ ।

તદ્બહિઃ પ્રણવસમ્પુટિતગરુડપઞ્ચાક્ષરયુક્તં વૃત્તમ્ ।
ૐ ક્ષિપ ૐ સ્વાહામ્ । ૐ તચ્ચ દ્વાદશવજ્રૈઃ
સાન્તરાલૈરલઙ્કૃતમ્ । તેષુ વજ્રેષુ
ૐ પદ્મનિધયે નમઃ । ૐ મહાપદ્મનિધયે નમઃ ।
ૐ ગરુડનિધયે નમઃ । શઙ્ખનિધયે નમઃ ।
ૐ મકરનિધયે નમઃ । ૐ કચ્છપનિધયે નમઃ ।
ૐ વિદ્યાનિધયે નમઃ । ૐ પરમાનન્દનિધયે નમઃ ।
ૐ મોક્ષનિધયે નમઃ । ૐ લક્ષ્મીનિધયે નમઃ ।
ૐ બ્રહ્મનિધયે નમઃ । ૐ શ્રીમુકુન્દનિધયે નમઃ ।
ૐ વૈકુણ્ઠનિધયે નમઃ । તત્સન્ધિસ્થાનેષુ—-
ૐ વિદ્યાકલ્પકતરવે નમઃ । ૐ મુક્તિકલ્પકતરવે નમઃ ।
ૐ આનન્દકલ્પકતરવે નમઃ । ૐ બ્રહ્મકલ્પકતરવે નમઃ ।
ૐ મુક્તિકલ્પકતરવે નમઃ । ૐ અમૃતકલ્પકતરવે નમઃ ।
ૐ બોધકલ્પકતરવે નમઃ । ૐ વિભૂતિકલ્પકતરવે નમઃ ।
ૐ વૈકુણ્ઠકલ્પકતરવે નમઃ । ૐ વેદકલ્પકતરવે નમઃ ।
ૐ યોગકલ્પકતરવે નમઃ । ૐ યજ્ઞકલ્પકતરવે નમઃ ।
ૐ પદ્મકલ્પકતરવે નમઃ ।
તચ્ચ શિવગાયત્રીપરબ્રહ્મમન્ત્રાણાં
વર્ણૈર્વૃત્તાકારેણ સંવેષ્ટ્ય ।
તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્ ।
શ્રીઅમન્નારાયણો જ્યોતિરાત્મા નારાયણઃ પરઃ ।
નારાયણપરં બ્રહ્મ નારાયણ નમોઽસ્તુ તે ।
તદ્બહિઃ પ્રણવસમ્પુટિતશ્રીબીજયુક્તં વૃત્તમ્ ।
ૐ શ્રીમોમિતિ । વૃત્તાદ્બહિશ્ચત્વારિંશદ્દલપદ્મમ્ ।
તેષુ દલેષુ વ્યાહૃતિશિરઃસમ્પુટિતવેદગાયત્રી-
પાદચતુષ્ટયસૂર્યાષ્ટાક્ષરમન્ત્રૌ ।
ૐ ભૂઃ । ૐ ભુવઃ । ૐ સુવઃ । ૐ મહઃ ।
ૐ જનઃ । ૐ તપઃ । ૐ સત્યમ્ ।
ૐ તત્સવિતુર્વરેણ્યમ્ । ૐ ભર્ગો દેવસ્ય ધીમહિ ।
ૐ ધિયો યો નઃ પ્રચોદયાત્ । ૐ પરોરજસે સાવદોમ્ ।
ૐ આપોજ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સુવરોમ્ ।

ૐ ઘૃણિઃ સૂર્ય આદિત્યઃ । તદ્દલસન્ધિષુ
પ્રણવશ્રીબીજસમ્પુટિતનારાયણબીજં સર્વત્ર ।
ૐ શ્રીમં શ્રીમોમ્ । તદ્બહિરષ્ટશૂલાઙ્કિતભૂચક્રમ્ ।
ચક્રાન્તશ્ચક્ષુર્દિક્ષુ હંસઃસોહમ્મન્ત્રૌ પ્રણવસમ્પુટિતા
નારાયણાસ્ત્રમન્ત્રાશ્ચ । ૐ હંસઃ સોહમ્ ।
ૐ નમો નારાયણાય હું ફટ્ । તદ્બહિઃ પ્રણવમાલાસંયુક્તં
વૃત્તમ્ । વૃત્તાદ્બહિઃ પઞ્ચાશદ્દલપદ્મમ્ ।
તેષુ દલેષુ માતૃકા પઞ્ચાશદક્ષરમાલા લકારવર્જ્યા ।
તદ્દલસન્ધિષુ પ્રણવશ્રીબીજસમ્પુટિતરામકૃષ્ણમાલામન્ત્રૌ ।
ૐ શ્રીમોં નમો ભગવતે રઘુનન્દનાય રક્ષોઘ્નવિશદાય
મધુરપ્રસન્નવદનાયામિતતેજસે બલાય રામાય વિષ્ણવે નમઃ ।
શ્રીમોં નમઃ કૃષ્ણાય દેવકીપુત્રાય વાસુદેવાય
નિર્ગલચ્છેદનાય સર્વલોકાધિપતયે સર્વજગન્મોહનાય વિષ્ણવે
કામિતાર્થદાય સ્વાહા શ્રીમોમ્ । તદ્બહિરષ્ટશૂલાઙ્કિતભૂચક્રમ્ ।
તેષુ પ્રણવસમ્પુટિતમહાનીલકણ્ઠમન્ત્રવર્ણાનિ ।
આઊમ્મોં નમો નીલકણ્ઠાય । ૐ શૂલાગ્રેષુ લોકપાલમન્ત્રાઃ
પ્રણવાદિનમોન્તાશ્ચતુર્થ્યન્તાઃ ક્રમેણ ।
ૐ ઇન્દ્રાય નમઃ । ૐ અગ્નયે નમઃ । ૐ યમાય નમઃ ।
ૐ નિરૃતયે નમઃ । ૐ વરુણાય નમઃ । ૐ વાયવે નમઃ ।
ૐ સોમાય નમઃ । ૐ ઈશાનાય નમઃ ।
તદ્બહિઃ પ્રણવમાલાયુક્તં વૃત્તત્રયમ્ ।
તદ્બહિર્ભૂપુરચતુષ્ટયં ચતુર્દ્વારયુતં
ચક્રકોણચતુષ્ટયમહાવજ્રવિભૂષિતં
તેષુ વજ્રેષુ પ્રણવશ્રીબીજસમ્પુટિતામૃતબીજદ્વયમ્ ।
ૐ શ્રીં ઠં વં શ્રીમોમિતિ । બહિર્ભૂપુરવીથ્યામ્ —-
ૐ આધારશક્ત્યૈ નમઃ । ૐ મૂલપ્રકૃત્યૈ નમઃ ।
ૐ આદિકૂર્માય નમઃ । ૐ અનન્તાય નમઃ ।
ૐ પૃથિવ્યૈ નમઃ । મધ્યભૂપુરવીથ્યામ્ —-
ૐ ક્ષીરસમુદ્રાય નમઃ । ૐ રત્નદ્વીપાય નમઃ ।
ૐ મણિમણ્ડપાય નમઃ । ૐ શ્વેતચ્છત્રાય નમઃ ।
ૐ કલ્પકવૃક્ષાય નમઃ । ૐ રત્નસિંહાસનાય નમઃ ।
પ્રથમભૂપુરવીથ્યામોં ધર્મજ્ઞાનવૈરાગ્યૈશ્વ-

ર્યાધર્માજ્ઞાનાવૈરાગ્યાનૈશ્વર્યસત્વરજસ્તમોમાયા-
વિદ્યાનન્તપદ્માઃ પ્રણવાદિનમોન્તાશ્ચતુર્થ્યન્તાઃ ક્રમેણ ।
અન્તવૃત્તવીથ્યામોમનુગ્રહાયૈ નમઃ । ૐ નમો ભગવતે
વિષ્ણવે સર્વભૂતાત્મને વાસુદેવાય સર્વાત્મસંયોગ-
યોગપીઠાત્મને નમઃ । વૃત્તવકાશેષુ—-બીજં પ્રાણં
ચ શક્તિં ચ દૃષ્ટિં વશ્યાદિકં તથા ।
મન્ત્રયન્ત્રાખ્યગાયત્રીપ્રાણસ્થાપનમેવ ચ ।
ભૂતદિક્પાલબીજાનિ યન્ત્રસ્યાઙ્ગાનિ વૈ દશ ।
મૂલમન્ત્રમાલામન્ત્રકવચદિગ્બન્ધનમન્ત્રાશ્ચ ।
એવંવિધમેતદ્યન્ત્રં મહામન્ત્રમયં યોગધીરાન્તૈઃ
પરમન્ત્રૈરલઙ્કૃતં ષોડશોપચારૈરભ્યર્ચિતં
જપહોમાદિના સાધિતમેતદ્યન્ત્રં શુદ્ધબ્રહ્મતેજોમયં
સર્વાભયઙ્કરં સમસ્તદુરિતક્ષયકરં સર્વાભીષ્ટ-
સમ્પાદકં સાયુજ્યમુક્તિપ્રદમેતત્પરમવૈકુણ્ઠ-
મહાનારાયણયન્ત્રં પ્રજ્વલતિ । તસ્યોપરિ ચ નિરતિશયાનન્દ-
તેજોરાશ્યભ્યન્તરસમાસીનં વાચામગોચરાનન્દ-
તેજોરાશ્યાકારં ચિત્સારાવિર્ભૂતાનન્દવિગ્રહં બોધાનન્દ-
સ્વરૂપં નિરતિશયસૌન્દર્યપારાવારં તુરીયસ્વરૂપં
તુરીયાતીતં ચાદ્વૈતપરમાનન્દનિરન્તરાતિતુરીયનિરતિશય-
સૌન્દર્યાનન્દપારાવારં લાવણ્યવાહિનીકલ્લોલતટિદ્ભાસુરં
દિવ્યમઙ્ગલવિગ્રહં મૂર્તિમદ્ભિઃ પરમમઙ્ગલૈરુપસેવ્યમાનં
ચિદાનન્દમયૈરનન્તકોટિરવિપ્રકાશૈરનન્તભૂષણૈરલઙ્કૃતં
સુદર્શનપાઞ્ચજન્યપદ્મગદાસિશાર્ઙ્ગમુસલપરિઘાદ્યૈ-
શ્ચિન્મયૈરનેકાયુધગણૈર્મૂર્તિમદ્ભિઃ સુસેવિતમ્ ।
બાહ્યવૃત્તવીથ્યાં વિમલોત્કર્ષિણી જ્ઞાન ક્રિયા યોગ પ્રહ્વી
સત્યેશાના પ્રણવાદિનમોન્તાશ્ચતુર્થ્યન્તાઃ ક્રમેણ ।
શ્રીવત્સકૌસ્તુભવનમાલાઙ્કિતવક્ષસં બ્રહ્મકલ્પવનામૃત-
પુષ્પવૃષ્ટિભિઃ સન્તતમાનન્દં બ્રહ્માનન્દરસનિર્ભરૈ-
રસંખ્યૈરતિમઙ્ગલં શેષાયુતફણાજાલવિપુલચ્છત્રશોભિતં
તત્ફણામણ્ડલોદર્ચિર્મણિદ્યોતિતવિગ્રહં તદઙ્ગકાન્તિનિર્ઝરૈસ્તતં
નિરતિશયબ્રહ્મગન્ધસ્વરૂપં નિરતિશયાનન્દબ્રહ્મગન્ધ-
વિશેષકારમનન્તબ્રહ્મગન્ધાકારસમષ્ટિવિશેષમન્તાનન્દ-

તુલસીમાલ્યૈરભિનવં ચિદાનન્દમયાનન્તપુષ્પમાલ્યૈર્વિરાજમાનં
તેજઃપ્રવાહતરઙ્ગતત્પરમ્પરાભિર્જ્વલન્તં નિરતિશયાનન્દં
કાન્તિવિશેષાવર્તૈરભિતોઽનિશં પ્રજ્વલન્તં બોધાનન્દમયાનન્ત-
ધૂપદીપાવલિનિરતિશોભિતં નિરતિશયાનન્દચામરવિશેષૈઃ
પરિસેવિતં નિરન્તરનિરુપમનિરતિશયોત્કટજ્ઞાનાનન્દાનન્તગુચ્છ-
ફલૈરલઙ્કૃતં ચિન્મયાનન્દદિવ્યવિમાનચ્છત્રધ્વજરાજિભિ-
ર્વિરાજમાનં પરમમઙ્ગલાનન્તદિવ્યતેજોભિર્જ્વલન્તમનિશં
વાચામગોચરમનન્તતેજોરાશ્યન્તર્ગતમર્ધમાત્રાત્મકં
તુર્યં ધ્વન્યાત્મકં તુરીયાતીતમવાચ્યં નાદબિન્દુકલાધ્યાત્મ-
સ્વરૂપં ચેત્યાદ્યનન્તાકારેણાવસ્થિતં નિર્ગુણં નિષ્ક્રિયં
નિર્મલં નિરવદ્યં નિરઞ્જનં નિરાકારં નિરાશ્રયં નિરતિશયાદ્વૈત-
પરમાનન્દલક્ષણમાદિનારાયણં ધ્યાયેદિત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ પરમમોક્ષસ્વરૂપ-
નિરૂપણદ્વારા ત્રિપાદ્વિભૂતિપરમવૈકુણ્ઠમહાનારાયણ-
યન્ત્રસ્વરૂપનિરૂપણં નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥

તતઃ પિતામહઃ પરિપૃચ્છતિ ભગવન્તં મહાવિષ્ણું
ભગવઞ્છુદ્ધાદ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મણસ્તવ
કથં વિરુદ્ધવૈકુણ્ઠપ્રાસાદપ્રાકારવિમાનાદ્યનન્તવસ્તુભેદઃ ।
સત્યમેવોક્તમિતિ ભગવાન્મહાવિષ્ણુઃ પરિહરતિ । યથા
શુદ્ધસુવર્ણસ્ય કટકમુકુટાઙ્ગદાદિભેદઃ । યથા
સમુદ્રસલિલસ્ય સ્થૂલસૂક્ષ્મતરઙ્ગફેનબુદ્બુદકરલવણ-
પાષાણાદ્યનન્તવસ્તુભેદઃ । યથા ભૂમેઃ પર્વતવૃક્ષ-
તૃણગુલ્મલતાદ્યનન્તવસ્તુભેદઃ । તથૈવાદ્વૈતપરમાનન્દ-
લક્ષણપરબ્રહ્મણો મમ સર્વાદ્વૈતમુપપન્નં ભવત્યેવ ।
મત્સ્વરૂપમેવ સર્વં મદ્વ્યતિરિક્તમણુમાત્રં ન વિદ્યતે ।
પુનઃ પિતામહઃ પરિપૃચ્છતિ । ભગવન્ પરમવૈકુણ્ઠ એવ
પરમમોક્ષઃ । પરમમોક્ષસ્ત્વેક એવ શ્રૂયતે સર્વત્ર ।
કથમનન્તવૈકુણ્ઠાશ્ચાનન્તાનન્દસમુદ્રાદયશ્ચાનન્ત-
મૂર્તયઃ સન્તીતિ । તથેતિ હોવાચ ભગવાન્મહાવિષ્ણુઃ ।
એકસ્મિન્નવિદ્યાપાદેઽનન્તકોટિબ્રહ્માણ્ડાનિ સાવરણાનિ શ્રૂયન્તે ।
તસ્મિન્નેકસ્મિન્નણ્ડે બહવો લોકાશ્ચ બહવો વૈકુણ્ઠાશ્ચાનન્ત-

વિભૂતયશ્ચ સન્ત્યેવ । સર્વાણ્ડેષ્વાનન્તલોકાશ્ચાનન્ત-
વૈકુણ્ઠાઃ સન્તીતિ સર્વેષાં ખલ્વભિમતમ્ । પાદત્રયેઽપિ
કિં વક્તવ્યં નિરતિશયાનન્દાવિર્ભાવો મોક્ષ ઇતિ મોક્ષલક્ષણં
પાદત્રયે વર્તતે । તસ્માત્પાદત્રયં પરમમોક્ષઃ । પાદત્રયં
પરમવૈકુણ્ઠઃ । પાદત્રયં પરમકૈવલ્યમિતિ ।
તતઃ શુદ્ધચિદાનન્દબ્રહ્મવિલાસાનન્દાશ્ચાનન્તપરમાનન્દ-
વિભૂતયશ્ચાનન્તવૈકુણ્ઠાશ્ચાનન્તપરમાનન્દસમુદ્રાદયઃ
સન્ત્યેવ । ઉપાસકસ્તતોઽભ્યેત્યૈવંવિધં નારાયણં ધ્યાત્વા
પ્રદક્ષિણનમસ્કારાન્વિધાય વિવિધોપચારૈરભ્યર્ચ્ય
નિરતિશયાદ્વૈતપરમાનન્દલક્ષણો ભૂત્વા તદગ્રે સાવધાનેનો-
પવિશ્યાદ્વૈતયોગમાસ્થાય સર્વાદ્વૈતપરમાનન્દલક્ષણા-
ખણ્ડામિતતેજોરાશ્યાકારં વિભાવ્યોપાસકઃ સ્વયં શુદ્ધ-
બોધાનન્દમયામૃતનિરતિશયાનન્દતેજોરાશ્યાકારો ભૂત્વા
મહાવાક્યાર્થમનુસ્મરન્ બ્રહ્માહમસ્મિ અહમસ્મિ
બ્રહ્માહમસ્મિ યોઽહમસ્મિ બ્રહ્માહમસ્મિ અહમેવાહં માં
જુહોમિ સ્વાહા । અહં બ્રહ્મેતિ ભાવનયા યથા પરમતેજોમહાનદી-
પ્રવાહપરમતેજઃપારાવાએ પ્રવિશતિ । યથા પરમતેજઃપારાવાર-
તરઙ્ગાઃ પરમતેજઃપારાવારે પ્રવિશન્તિ । તથૈવ સચ્ચિદાન-
ન્દાત્મોપાસકઃ સર્વપરિપૂર્ણાદ્વૈતપરમાનન્દલક્ષણે પરબ્રહ્મણિ
નારાયણે મયિ સચ્ચિદાત્મકોઽહમજોઽહં પરિપૂર્ણોઽહમસ્મીતિ
પ્રવિવેશ । તત ઉપાસકો નિસ્તરઙ્ગાદ્વૈતાપારનિરતિશયસચ્ચિદાનન્દ
સમુદ્રો બભૂવ । યસ્ત્વનેન માર્ગેણ સમ્યગાચરતિ સ નારાયણો
ભવત્યસંશયમેવ । અનેન માર્ગેણ સર્વે મુનયઃ સિદ્ધિં ગતાઃ ।
અસંખ્યાતાઃ પરમયોગિનશ્ચ સિદ્ધિં ગતાઃ ।
તતઃ શિષ્યો ગુરું પરિપૃચ્છતિ । ભગવન્ત્સાલમ્બ-
નિરાલમ્બયોગૌ કથમિતિ બ્રૂહીતિ । સાલમ્બસ્તુ સમસ્તકર્માતિ-
દૂરતયા કરચરણાદિમૂર્તિવિશિષ્ટં મણ્ડલાદ્યાલમ્બનં
સાલમ્બયોગઃ । નિરાલમ્બસ્તુ સમસ્તનામરૂપકર્માતિદૂરતયા
સર્વકામાદ્યન્તઃકરણવૃત્તિસાક્ષિતયા તદાલમ્બનશૂન્યતયા
ચ ભાવનં નિરાલમ્બયોગઃ । અથ ચ નિરાલમ્બયોગાધિકારી
કીદૃશો ભવતિ । અમાનિત્વાદિલક્ષણોપલક્ષિતો વઃ પુરુષઃ
સ એવ નિરાલમ્બયોગાધિકારી કાર્યઃ કશ્ચિદસ્તિ । તસ્માત્સર્વેષા-

મધિકારિણામનધિકારિણાં ભક્તિયોગ એવ પ્રશસ્યતે । ભક્તિયોગો
નિરુપદ્રવઃ । ભક્તિયોગાન્મુક્તિઃ । બુદ્ધિમતામનાયાસેનાચિરાદેવ
તત્ત્વજ્ઞાનં ભવતિ । તત્કથમિતિ । ભક્તવત્સલઃ સ્વયમેવ સર્વેભ્યો
મોક્ષવિઘ્નેભ્યો ભક્તિનિષ્ઠાન્સર્વાન્પરિપાલયતિ । સર્વાભીષ્ટા-
ન્પ્રયચ્છતિ । મોક્ષં દાપયતિ । ચતુર્મુખાદીનાં સર્વેષામપિ
વિના વિષ્ણુભક્ત્યા કલ્પકોટિભિર્મોક્ષો ન વિદ્યતે । કારણેન વિના
કાર્યં નોદેતિ । ભક્ત્યા વિના બ્રહ્મજ્ઞાનં કદાપિ ન જાયતે ।
તસ્માત્ત્વમપિ સર્વોપાયાન્પરિત્યજ્ય ભક્તિમાશ્રય । ભક્તિનિષ્ઠો
ભવ । ભક્તિનિષ્ઠો ભવ । ભક્ત્યા સર્વસિદ્ધયઃ સિધ્યન્તિ ।
ભક્ત્યાઽસાધ્યં ન કિંચિદસ્તિ । એવંવિધં ગુરૂપદેશમાકર્ણ્ય
સર્વં પરમતત્ત્વરહસ્યમવબુધ્ય સર્વસંશયાન્વિધૂય
ક્ષિપ્રમેવ મોક્ષં સાધયામીતિ નિશ્ચિત્ય તતઃ શિષ્યઃ સમુત્થાય
પ્રદક્ષિણનમસ્કારં કૃત્વા ગુરુભ્યો ગુરુપૂજાં વિધાય
ગુર્વનુજ્ઞયા ક્રમેણ ભક્તિનિષ્ઠો ભૂત્વા ભક્ત્યતિશયેન
પક્વં વિજ્ઞાનં પ્રાપ્ય તસ્માદનાયાસેન શિષ્યઃ ક્ષિપ્રમેવ
સાક્ષાન્નારાયણો બભૂવેત્યુપનિષત્ ॥

તતઃ પ્રોવાચત્ ભગવાન્ મહાવિષ્ણુશ્ચતુર્મુખમવલોક્ય
બ્રહ્મન્ પરમતત્ત્વરહસ્યં તે સર્વં કથિતમ્ । તત્સ્મરણ-
માત્રેણ મોક્ષો ભવતિ । તદનુષ્ઠાનેન સર્વમવિદિતં વિદિતં
ભવતિ । યત્સ્વરૂપજ્ઞાનિનઃ સર્વમવિદિતં વિદિતં ભવતિ । તત્સર્વં
પરમરહસ્યં કથિતમ્ । ગુરુઃ ક ઇતિ । ગુરુઃ સાક્ષાદાદિનારાયણઃ
પુરુષઃ । સ આદિનારાયણોઽહમેવ । તસ્માન્મામેકં શરણં
વ્રજ । મદ્ભક્તિનિષ્ઠો ભવ । મદીયોપાસનાં કુરુ । મામેવ
પ્રાપ્સ્યસિ । મદ્વ્યતિરિક્તં સર્વં બાધિતમ્ । મદ્વ્યતિરિક્તમબાધિતં
ન કિંચિદસ્તિ । નિરતિશયાનન્દાદ્વિતીયોઽહમેવ । સર્વપરિપૂર્ણોઽહમેવ ।
સર્વાશ્રયોઽહમેવ । વાચામગોચરનિરાકારપરબ્રહ્મસ્વરૂપોઽહમેવ ।
મદ્વ્યતિરિક્તમણુમાત્રં ન વિદ્યતે । ઇત્યેવં મહાવિષ્ણોઃ પરમિમમુપદેશં
લબ્ધ્વા પિતામહઃ પરમાનન્દં પ્રાપ । વિષ્ણોઃ કરાભિમર્શનેન
દિવ્યજ્ઞાનં પ્રાપ્ય પિતામહસ્તતઃ સમુત્થાય પ્રદક્ષિણનમસ્કારા-
ન્વિધાય વિવિધોપચારૈર્મહાવિષ્ણું પ્રપૂજ્ય પ્રાઞ્જલિર્ભૂત્વા
વિનયેનોપસંગમ્ય ભગવન્ ભક્તિનિષ્ઠાં મે પ્રયચ્છ । ત્વદભિન્નં

માં પરિપાલય કૃપાલય । તથૈવ સાધુસાધ્વિતિ સાધુપ્રશંસાપૂર્વકં
મહાવિષ્ણુઃ પ્રોવાચ । મદુપાસકઃ સર્વોત્કૃષ્ટઃ સ ભવતિ ।
મદુપાસનયા સર્વમઙ્ગલાનિ ભવન્તિ ।
મદુપાસનયા સર્વં જયતિ । મદુપાસકઃ સર્વવન્દ્યો ભવતિ ।
મદીયોપાસકસ્યાસાધ્યં ન કિંચિદસ્તિ । સર્વે બન્ધાઃ
પ્રવિનશ્યન્તિ । સદ્વૃત્તમિવ સર્વે દેવાસ્તં સેવન્તે ।
મહાશ્રેયાંસિ ચ સેવન્તે । મદુપાસકસ્તસ્માન્નિરતિશયા-
દ્વૈતપરમાનન્દલક્ષણપરબ્રહ્મ ભવતિ । યસ્તુ પરમતત્ત્વ-
રહસ્યાથર્વણમહાનારાયણોપનિષદમધીતે સર્વેભ્યઃ
પાપેભ્યો મુક્તો ભવતિ । જ્ઞાનાજ્ઞાનકૃતેભ્યઃ પાતકેભ્યો
મુક્તો ભવતિ । મહાપાતકેભ્યઃ પૂતો ભવતિ । રહસ્યકૃત-
પ્રકાશકૃતચિરકાલાત્યન્તકૃતેભ્યસ્તેભ્યઃ સર્વેભ્યઃ
પાપેભ્યો મુક્તો ભવતિ । સ સકલલોકાઞ્જયતિ । સ સકલમન્ત્ર-
જપનિષ્ઠો ભવતિ । સ સકલવેદાન્તરહસ્યાધિગતપરમાર્થજ્ઞો
ભવતિ । સ સકલભોગભુગ્ભવતિ । સ સકલયોગવિદ્ભવતિ । સ સકલ-
જગત્પરિપાલકો ભવતિ । સોઽદ્વૈતપરમાનન્દલક્ષણં પરબ્રહ્મ
ભવતિ । ઇદં પરમતત્ત્વરહસ્યં ન વાચ્યં ગુરુભક્તિવિહીનાય ।
ન ચાશુશ્રૂષવે વાચ્યમ્ । ન તપોવિહીનાય નાસ્તિકાય ।
ન દામ્ભિકાય મદ્ભક્તિવિહીનાય । માત્સર્યાઙ્કિતતનવે ન
વાચ્યમ્ । ન વાચ્યં મદસૂયાપરાય કૃતઘ્નાય । ઇદં
પરમરહસ્યં યો મદ્ભક્તેષ્વભિધાસ્યતિ । મદ્ભક્તિનિષ્ઠો
ભૂત્વા મામેવ પ્રાપ્સ્યતિ । આવયોર્ય ઇમં સંવાદમધ્યેષ્યતિ ।
સ નરો બ્રહ્મનિષ્ઠો ભવતિ । શ્રદ્ધાવાનનસૂયુઃ શ્રુણુયા-
ત્પઠતિ વા ય ઇમં સંવાદમાવયોઃ સ પુરુષો મત્સાયુજ્યમેતિ ।
તતો મહાવિષ્ણુસ્તિરોદધે । તતો બ્રહ્મા સ્વસ્થાનં જગામેત્યુપનિષત્ ॥

ઇત્યાથર્વણમહાનારાયણોપનિષદિ પરમસાયુજ્યમુક્તિ-
સ્વરૂપનિરૂપણં નામાષ્ટમોઽધ્યાયઃ ॥ ૮॥

ઇતિ ત્રિપાદ્વિભૂતિમહાનારાયણોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Tripad-Vibhuti-MahanArayana Upanishad*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*